मदनादिनिघण्टुः

सम्पादिका
डाक्टर् पि. विशालाक्षी

पौरस्त्यहस्तलिखितग्रन्थशाला
केरलसर्वकलाशाला
कार्यवट्टम्, तिरुवनन्तपुरम्

मदनादिनिघण्टुः

मदनादिनिघण्टुः

सम्पादिका

डाक्टर् पि. विशालाक्षी

पौरस्त्यहस्तलिखितग्रन्थशाला
केरलसर्वकलाशाला
कार्यवट्टम्, तिरुवनन्तपुरम्

अनन्तशयनसंस्कृतग्रन्थावली ग्रन्थाङ्कः २६८

मदनादिनिघण्टुः

डाक्टर् पि. विशालाक्षी

Trivandrum Sanskrit Series: 268

MADANĀDINIGHAṆṬUḤ

Editor
Dr. P. Visalakshy

Published by Dr. P. Visalakshy, Reader in Charge
Oriental Research Institute & Manuscripts Library
for the University of Kerala, Thiruvananthapuram.
First published January 2005

Price Rs. 95 /-

Type setting and Printing
SB Press (P) Limited, Thiruvananthapuram - 695 001
Phone/Fax: 0471-2471904, 2478013
E-mail: sbpress@satyam.net.in

PREFACE

Āyurveda, the Indian system of medicine has endeared the people of Kerala from a very long period. Consequently, manuscripts in Āyurveda can be found here in abundance. Most of such manuscripts are with private custodians about whom only a very little is now known. Dr. K. V. Sarma has made a survey of the Science texts in Sanskrit in the manuscript repositories of Kerala and Tamilnadu. The repositories covered are those on which information is obtained to him. Many other repositories, especially private, are yet to be surveyed. Even with this limitation Dr. Sarma could enlist 1286 Āyurveda manuscripts out of which 586 are independent texts. He states that the ayurvedic texts composed in Kerala outnumber those produced in Tamilnadu.

It is heartening to see that some of the institutions like Government Āyurveda College - Trivandrum, Kottakkal Aryavaidyasala and the Oriental Research Institute & Manuscripts Library, University of Kerala take interest in the publication of Āyurveda manuscripts. The Āyurveda manuscripts published from Oriental Research Institute & Manuscripts Library under the Trivandrum Sanskrit Series and Trivandrum Malayalam Series are as follows:

Hṛdayapriya, Mataṅgalīlā, Aṣṭāṅgahṛdaya, Jvaranirṇaya, Bhojanakutūhala, Vaidyamañjarī, Tantrayuktivicāra, Aṣṭāṅgasāram Bhāṣā, Mātaṅgalīla (Malayalam) and Aśvacikitsa.

In addition, many small works in Āyurveda were published through the two Journals of this institution viz. Journal of Manuscript Studies and Praceenakairali. The present publication 'Madanādinighaṇṭu' brought out as TSS. No. 268 is a new addition to the Āyurveda publications of this institution.

Madanādinighaṇṭu is a 10th century work by Candranandana. It is useful not only for the Āyurveda physicians but also for those who are interested in this system. Since the Thiruvananthapuram manuscript gives the Malayalam equivalence of the medicinal items, it gives an added advantage to the Malayalam knowing readers. The Indices and the meanings of the Malayalam medicinal terms given at the end of the book, it is hoped, will be useful even to the nonexperts in Āyurveda.

For writing the Introduction of this book, though different works were consulted, the following two books need to be specially mentioned. They are (1) 'Āyurveda Itihāsam' a publication of the Government Āyurveda College Thiruvananthapuram edited by Dr. K. P. Sreekumary Amma and (2) Kerala Sanskrit Literature - A Bibliography by Dr. S. Venkitasubramonia Iyer, Kerala University Sanskrit Department Publication.

I express my sincere thanks to the staff and management of S.B. Press (P) Ltd, Thiruvananthapuram for the interest they have shown in getting this book printed.

Karyavattom
10-01-2005

P. Visalakshy

INTRODUCTION

Āyurveda is the science of health. The etymology 'āyuṣo vedaḥ - āyurvedaḥ' clearly indicates this fact. It is a major discipline and is not confined to the health problems and their remedies concerning the human beings only but also of all living beings. Thus in addition to the human beings, other living beings like birds, animals, plants and trees do come under the purview of Āyurveda. In short, the health aspects coming under the veterinary and agricultural sciences are also part of this medical science. It has eight major branches. They are: śalya (surgery), śālākya (cure of diseases of the eyes, ears etc by using śalākas or sharp instruments) (3) kāyacikitsā (cure of diseases affecting the whole body) (4) bhūtavidya (psychotherapy) (5) kaumārabhṛtya (paediatrics) (6) agadatantra (science of antidotes) (7) rasāyanatantra (preparation and application of elixirs) and vājīkaraṇatantra (aphrodisiacs).

The Āyurveda system of medicine has a hoary past and its roots can be traced back to prehistoric times. The remnants obtained from Harappa and Mohenjodaro reveal that even at the time of Indus Valley Civilization (4 - 3 millennium B.C) the ayurvedic medicines were in vogue. Sir John Marshall identified kṛṣṇagoḷa ọbtained from Mohenjodaro as 'śilājatu' (bratanum) an important medicine in Āyurveda. Similarly 'hariṇaśṛṅgam' was obtained from there and it is widely used in ayurvedic treatments. There is ample proof to substantiate that ayurvedic medicines were practiced

in India from ancient times to till date without having a discontinuity and that is why references on Āyurveda are seen in the literary works of all periods. During the Vedic period Āyurveda was a well developed science. Among the Vedas it is Atharva which gives more information on Āyurveda. Discussions can be seen in it on human physiology, causes for diseases and their cure and prevention. This close relationship between Āyurveda and Atharvaveda is recognized by Caraka through his statement "caturṇām ṛgsāmayajuratharvavedānām ātmanoratharvavede bhaktirādeśyā..". But due to the nature of this science, ācāryas like Vedavyāsa consider it as an Upaveda of Ṛgveda. "sarveṣāmapi vedānām upavedo bhavati. ṛgvedasya āyurveda upavedaḥ" The mentioning of Āyurveda can be seen in Purāṇas also. Brahmavaivarttaka Purāṇa, one of the Aṣṭādaśapurāṇas considers Āyurveda as the essence of the Vedas.

Early inscriptions like those of Aśoka (3rd century B.C) do indicate the popularity of Āyurveda among the ancient Indians. For instance, the 2nd inscription of Aśoka reads "sarvatra vijite devānāmpiyasya paśumanuṣyāṇām". It gives information to the fact that during his period there were separate centres for medical treatment for human beings and animals. The 13th inscription of Aśoka shows that there existed different treatments for human beings and animals. It becomes more evident from the works like Aśvacikitsa of Jayadatta, Mataṅgalīlā of Nārāyaṇa and Vṛkṣāyurveda of Surapāla. It is to be remembered that Āyurveda was respected by everybody in India. Because of this, Ṛṣis like Kāśyapa consider it as the fifth Veda.

Literary Tradition of Āyurveda

The Bower manuscripts (3rd Century A.D) throw much light on the ayurvedic tradition of India. Bower manuscripts are those which are traced in 1890 by the British Lieutenant Bower from Kuchiar in Chinese Turkestan. These manuscripts are grouped into five sections and the first among them is Āyurveda. The ancient works on this science are those of the ācāryas like Dhanvantari, Suśruta, Caraka, Ātreya, Bharadvāja, Punarvasu etc. Dhanvantari is considered to be the early practitioner of Āyurveda. He is believed to be the physician of the Gods, said to have been originated at the churning of Kṣīrasāgara with a cup of nectar in his hand.

"lakṣmīkaustubha pārijātakusumā dhanvantariścandramā
gāvo kāmadughā sureśvaragajo rambhādi devāṅganāḥ
aśvaḥ saptamukho viṣam haridhanuḥ
śaṅkho'mṛtamcāmbudheḥ
ratnānīha caturdaśa pratidinam kuryuḥ sadā maṅgalam".

Subsequent to this famous ācārya, many other scholars in Āyurveda are also known as 'Dhanvantari'. It can be seen that one of the 'Nine Jewels' of the royal court of Emperor Vikramaditya was a person named Dhanvantari. The following verse proves this fact.

"dhanvantarī kṣapaṇakāmarasimha śaṅkhu
vetāḷabhaṭṭa ghaṭakarpara kālidāsa
khyāto varāhamihirornṛpatersabhāyām
ratnānivai vararucirnava vikramasya".

Divodāsa the king of Kāśi, a famous scholar in Āyurveda was also known as Dhanvantari. This is evidenced from the following verse of Bhāvaprakāśa.

"viśvāmitro munisteṣu putram suśrutamuktavān
vatsa vārāṇasīm gaccha tvam viśveśavaravallabham
tatra nāmnā divodāsaḥ kāśirājo'sti bāhujaḥ
sa hi dhanvantariḥ sākṣādāyurvedavidām varaḥ.
pitṛvacanamākarṇya suśrutaḥ kāśikām gataḥ
tena sārdham samadhyetum munisūnuśatam yayuḥ".

The above verse not only mentions the fact that Divodāsa is known as Dhanvantari but also states that Suśruta is the son of Viśvāmitra. Suśruta the great ācārya was a specialist in surgery. He is the author of the famous work Suśrutasaṃhita. The original work might have been lost and the present text appears to be a later modification based on the surgical experiences of individuals like Aupadhenva and Aurabhra. Another great ācārya in Āyurveda is Caraka. He is considered as a wandering mendicant and is the author of the famous Carakasaṃhita. He is an authority in Kāyacikitsa. Svāminātha the author of Carakapañcikā (7th century A.D) opines that Caraka is none other than Patañjali, the author of Mahābhāṣya. This view does not get acceptance since Caraka belongs to Pāñcāladeśa and Patañjali belongs to Gonarda (Kāśmīra). Moreover Patañjali's period (2nd Century B.C) is said to be later to that of Caraka. Another eminent personality in this medicinal system is Ātreya. He is the son of sage Atri. He is one of the most respected among the early ācāryas and is believed to

have a separate school of thought in Āyurveda. Bharadvāja is an ardent follower of the Ātreya School. Bharadvāja is said to be the son of Bṛhaspati and the father of Droṇa. References to Bharadvāja are found in Ṛg and Atharva Vedas and also in Itihāsas like Mahābhārata and Rāmāyaṇa. He is the author of the works Bharadvājīyam and Bheṣajakalpam. Another follower of Ātreya is his disciple Punarvasu, the author of Bhelasaṃhita.

Subsequent to the dawn of Christian era too there existed a good number of great scholars in Āyurveda. The most outstanding among them is Vāgbhaṭa (Vāhaṭa). His renowned work Aṣṭāṅgahṛdaya is an authoritative treatise and is very popular all over India. The very fact that a large number of commentaries have been brought out for this work by different scholars indicate the prominence of this work. Vāgbhaṭa a Brahmin by birth but a Buddhist by faith is the son of Saṅghagupta. He belongs to the Sindh region and his period is 6th Century A.D. Though Aṣṭāṅgahṛdaya is an independent work it is a quintessence of the works of both Caraka and Suśruta.

It may be noted that most of the Āyurveda works still remain in manuscript forms. Āyurveda manuscripts can be found even in almost all the villages of India. Many such manuscripts are still unread and thus unrecognized. Among them it is possible that a few might be works which are not yet known to the world. Similarly some of them might be written by scholars about whom no information is so far available.

Āyurveda Tradition in Kerala

The impact of Āyurveda is deep rooted in Kerala society. This system got acceptance and popularity in this region from a very early period. There exist traditional families who engage themselves in the practice of Āyurveda. Such families can be seen without having any caste or religious restriction. That is, they are found in both forward and backward communities. Among them some profess general medicine while some others are specialists in any one of the fields such as Toxicology, Ophthalmology, Orthopaedics etc. Certain families concentrate both on Jyotiṣa and Āyurveda. When compared to other oriental medicinal systems like Siddha, Unani etc., people from all walks of life in Kerala show much affinity towards Āyurveda. Even after the advent of allopathic medicine in India, at no point of time the popularity of Āyurveda was diminished in Kerala. The flora and fauna and the consequent easy availability of medicinal plants might have given much impetus to the preparation and practice of ayurvedic medicines in this part of the country. To some extent, modern techniques for diagnosis of diseases and preparation of medicines are adopted in order to suit the modern way of life. Even then, generally speaking, ayurvedic tradition is retained and professed in Kerala without hampering its traditional purity.

Important works on Āyurveda were well studied and exhaustive commentaries on them were produced by Keralites. Among the ayurvedic treatises, Vāgbhaṭa's Aṣṭāṅgahṛdaya is the most popular one in Kerala. Several commentaries of this work

are found in this region. Among them Pāṭhya of anonymous authorship, Vākyapradīpikā of Alattur Paramesvaran Nambi (chpts 1 - 10 of Sūtrasthāna), Kairaḷī comentary for the Uttarasthāna by Planthol Moosad, Aṣṭāṅgahṛdayavyākhyā of Govinda Pisharadi are a few examples. Aṣṭāṅgahṛdayakośa of K.M. Vaidyar provides the technical terms of Aṣṭāṅgahṛdaya arranged in alphabetical order. There are many independent works and commentaries by Kerala authors. Following are a few examples for the same. Viṣanārāyaṇīya of Nārāyaṇa, a 16th century work on Toxicology is an authoritative one. Hṛdayapriya of Vaikkattu Paccumoothatu is a major work and it contains four parts consisting of sixty chapters. This popular work is of 1865 and published under Trivandrum Sanskrit Series (TSS 111). Sukhasādhaka consisting of twelve khaṇḍās is an abridgement of Hṛdayapriya. It is by the same author and is of 1881. Vadakkeppat Narayanan Nair brought out Aṇugrahamīmāṃsa in six sections. This work deals with Bacteriology. P.S.Variyar's Aṣṭāṅgaśārīraka is an important work. It is based on Aṣṭāṅgahṛdaya and other ayurvedic works. This work is published in 1925 along with a ṭippaṇī called Gūḍhārthabodhinī. It incorporates some western ideas also. Another work Bṛhaccārīraka in twenty one chapters by the same author deals with human Anatomy and Physiology combining Indian and Western systems. Sadācāravṛttivarttana a work of Aryasarman consists of seventeen chapters. It discusses both Vaidya and Vedānta. Sarvagaralapramocana of Kuttamattu Ramakurup is a valuable work having twelve chapters. This work deals with the treatment of poison. Yogasārasaṅgraha of Vāsudeva explains

different kinds of medicinal preparations. Ārogyaśāstra of Kodungalloor Kochunni Thampuran with his own commentary is a noteworthy publication. Rasatantra of A.R. Rajarajavarma and Rasamañjarī of Thaikkat Narayanan Moosad deal with Rasāyanatantra. Cikitsāsthāna of Keralavarma Ilayaraja of Cochin Palace, Hṛdayollāsa commentary of Suśrutasaṃhita by C.K. Vasudeva Sarma and his Malayalam commentaries for Carakasaṃhita, Sukhasādhaka, Śārṅgadharasaṃhita, Añjananidānam, Aṣṭasthānaparīkṣa and Yogaratnākara require special mention. Vāsudevīya commentary on Aṣṭāṅgahṛdaya is also of the above author. K.M. Narayanan Vaidyar's Malayalam commentaries for Suśrutasaṃhita and Sūtrasthāna of Aṣṭāṅgahṛdaya are very valuable. Vācaspatya commentary on Carakasaṃhita by Vācaspati T.C. Parameswaran Moosad, Līlāplava commentary for Aṣṭāṅgahṛdaya by Vasudevan Moosad, the Malayalam commentary Prakāśika for Aṣṭāṅgahṛdaya by Raghavan Tirumulpad, Sārārthadarpaṇa commentary for Aṣṭāṅgahṛdaya by Kaikkulangara Rama Variyar, Aruṇodaya commentary on Aṣṭāṅgahṛdaya by Kayikkara Govindan Vaidyar, the Gūḍhārthacandrikā commentary for Śārṅgadharam by Cheppat Acyuta Variyar, Sārabodhinī commentary on Aṣṭāṅgahṛdaya by Kochu Sankaran Vaidyan, Bhāskara commentary of Aṣṭāṅgahṛdaya by Uppottu Kannan and Alpabuddhiprabodhanam a Malayalam commentary of Aṣṭāṅgahṛdaya by Sreekantha are some valuable commentaries on ayurvedic treatises by Kerala authors. In addition to this, many commentaries for Aṣṭāṅgahṛdaya in different languages are popular in Kerala. A few among them

are Nidānacintāmaṇi, Bālabodhinī, Hṛdya, Uddhyota, Saṅketamañjarī, Vāgbhaṭakhaṇḍanamaṇḍana, Vaiḍūryakabhāṣya, Vijñeyārthaprakāśikā, Lalitā and Pañcikā.

Sūtikāmṛtam written by Kayikkara Govindan Vaidyar is a commendable publication. His translation of Aṣṭāṅgahṛdaya entitled Aṣṭāṅgahṛdayabhāṣā is a work to be specially mentioned. So also the Malayalam translation of the Sūtrasthāna of Aṣṭāṅgahṛdaya by Kesavan Embranthiri is a useful contribution to this field. There is a Maṇipravāḷakāvya in Āyurveda and its name is Yogāmṛtam and the author of this work is Uppottu Kannan.

Nighaṇṭus in Āyurveda

Most of the ancient works on Āyurveda are in Sanskrit language. The meanings of the Sanskrit words found in Āyurveda quite often vary from their literary meanings. For example, the literary meaning of the word 'Dvija' (twice born) is Brahmin. In Āyurveda this word is used in the sense of teeth. The widely understood meaning of Sanskrit term 'Sannyāsa' is renunciation of worldly pleasures (sam nyasate iti sannyāsaḥ). In Āyurveda this word indicates catalepsy (coma stage). 'Bhāvana' in Āyurveda refers to pharmaceutical process and not imagination. A good number of similar words can be found in Āyurveda which exhibit considerable variation from their ordinary meanings. Hence the Sanskrit works on Āyurveda if need to be studied and understood correctly the knowledge of the specialized meanings of the Sanskrit

ayurvedic terms is inevitable. Such a necessity caused the origin of a good number of Āyurveda Nighaṇṭus. Among them some are the usual dictionary type while some others are encyclopedic in nature. A detailed list of all Ayurvedic Nighaṇṭus and their classification are not attempted since the present aim is only to cite some of the important Nighaṇṭus in Āyurveda. The following are a few such works:

Madanavinodanighaṇṭu, Madanapālanighaṇṭu, Madanādi nighaṇṭu, Kaiyadevanighaṇṭu, Suśrutanighaṇṭu, Abhinavacintā maṇisāra, Aṣṭāṅganighaṇṭu, Aṣṭāṅgahṛdayanighaṇṭu, Āyurveda nighaṇṭu, Auṣadhināmāni, Auṣadhinighaṇṭu, Dakṣiṇāmūrti nighaṇṭu, Dravyaratnākaranighaṇṭu, Paryāyamañjarī, Vaidyagaṇa nighaṇṭu, Śataślokīnighaṇṭu, Sārasaṅgrahanighaṇṭu and Hṛdayanighaṇṭu

The Present work

This Edition of Madanādinighaṇṭu is based on a single palm-leaf manuscript (bearing the No.1086 - A) kept in the Oriental Research Institute & Manuscripts Library, University of Kerala. The manuscript is complete except for the initial benedictory verse. Though the language is Sanskrit it is written in Malayalam script. The number of folios is 14 and the number of granthas is 220. The folios are of 24 cms in length and 4.5 cms in width. It is an old manuscript but is readable. The work consists of 32 gaṇas comprising 285 entries of medicinal items. There are three more

manuscripts in Kerala. They are in Government Sanskrit College - Trippunithura, Kumārapuram Palace - Ollur and Ciraṭṭamaṇ Illam - Kottayam. The Trippunithura manuscript is complete but is very old and brittle. Even a Xerox copy taken from it could not be read and hence not utilized for this Edition. The information on Ollur and Ciraṭṭamaṇ manuscripts are obtained from secondary sources and that too only after the printing of this book was started. A published Edition of this work by Shri. N.S. Moos is available and it is mainly based on the manuscript from Ciraṭṭamaṇ Illam. The Trivandrum manuscript shows considerable variation from that. The information on Ollur manuscript is obtained from a recent publication 'Science Texts in Sanskrit Manuscripts Repositories of Kerala and Tamilnadu' by Dr. K. V. Sarma.

As the name Madanādinighaṇṭu suggests, it provides information on medicinal items commencing from 'madana'. The word 'madana' means emetic nut which is one of the eight drugs in Aṣṭavarga and its botanical name is 'Randia Dumetorum'. The first verse begins with 'madana' and hence the name Madanādinighaṇṭu. The description of items dealt with is in verses and in them synonyms of each entry are pointed out. In addition, the work also provides information on the cure of the diseases for which each item is used. Madanādinighaṇṭu is also known as 'Gaṇanighaṇṭu'. For every entry the corresponding Malayalam word is given in the Trivandrum manuscript on which this Edition is prepared.

Author and Date

This work is composed in the pattern of 'Madanapālanighaṇṭu'. Hence it is obvious that the author of Madanādinighaṇṭu is subsequent to Madanapāla. The name and the period of the author are not mentioned in Trivandrum manuscript. At the outer folio it is written 'Mādhavan vaka' (owned by Madhavan). It means that the owner of this manuscript is one Madhavan. Since Malayalam equivalents are given for each and every entry and the script used is Malayalam, the scribe and the owner (even if they are same or different) belong to Kerala. However in the vandanaśloka found in other manuscripts the names of the author and his father are mentioned.

> "praṇamya mūrdhnā sarvajñam nighaṇṭurabhidhīyate
> candranandanasamjñena ravinandanasūnunā
> aṣṭāṅgahṛdayokteṣu gaṇeṣu madanādiṣu
> dravyeṣu viprakīrṇeṣu tathā samjñāntareṣu ca".

From this it becomes clear that the author of Madanādinighaṇṭu is Candranandana, the son of Ravinandana. Shri. N.S. Moos says that a manuscript of this work is kept in the 'Bibliotheque Nationale' in Paris and it consists of 33 gaṇas. He further states that the title page of this manuscript reads "śrīravinandanasūnu candranandanakṛtaḥ gaṇanighaṇṭu". It shows that this work Madanādinighaṇṭu is also known as 'Gaṇanighaṇṭu' and its author is Candranandana, the son of Ravinandana. Candranandana is also the author of the Padārthacandrikā

commentary of Sūtrasthāna of Aṣṭāṅgahṛdaya. Though the period of the author is not mentioned in any of the above manuscript, the scholars are of the opinion that Candranandana lived during 10th century A.D.

In this Edition the entry numbers and the titles are given by the present Editor. The titles of the entries are chosen arbitrarily from the synonyms given under each item. In the manuscript, the Malayalam terms are mostly found in the middle and in a few instances at the end of the description of the item. The change of bringing them to the top and placing them in brackets on the right side of the title is a change effected by the Editor. The indices given at the end of the book are new additions of the Editor. Hope this work published under Trivandrum Sanskrit Series will be useful to all those who are engaged in the study, research and practicing of Āyurveda.

मदनादिनिघण्टुः

प्रथमो गणः

हरिः

मदनमधुकलम्बानिम्बबिम्बीविशाला
त्रपुस कुटजमूर्वा देवताली कृमिघ्नम्।
विदुलदहनचित्राः कोशवत्यौ करञ्जः
कणलवणपचैलासर्षपाच्छर्दनानि ।।

1. मदनं (മലങ്കാരയ്ക്ക)

मदनश्शल्यको राठः पिण्डीतः करघाटकः
गालाः फलं गालवश्च श्वसनो विषपुष्पकः ।
मदनः कटुको तिक्तः तथारूक्षो व्रणापहः
श्लेष्मज्वरप्रतिश्याय गुल्मान्तर्विद्रधीषु च ।।

2. मधुयष्टी (അതിമധുരം)

मधुयष्टी च मधुकं यष्ट्यां वा मधुयष्टिका
यष्टीमधुक्लीतनकं स्थलजं जलजं द्विधा।
मधुकं रक्तपित्तघ्नं वृणशोधनरोपणम्
गुरुस्वादुहिमं वृष्यं चक्षुष्यं स्वरवर्णकृत् ।।

3. लंबा (കൈപ്പച്ചുര)

कटुकाऽलाबुनी लंबा तुम्पीक्ष्वाकुर्महाफला
राजपुत्री पिण्डफला तिक्तालाबुर्महत्फला ।

कफपित्तहरा तिक्ता रसे पाके हिमा लघुः
ऊष्मरोगहरा तुम्पी कफपित्ते प्रशस्यते।।

4. निंब (ആര്യവേപ്പ്)

निंबोऽरिष्टः पिचुमन्दः शुकप्रिय सुतिक्तकः ।
सर्वतस्सर्वतोभद्रः प्रभद्रो वरतिक्तकः।।

5. महानिंब (മലവേപ്പ്)

अन्यो निंबो महानिंबो गैरिकश्शुकमालकः
बृहन्निंबो निंबरकः कार्मुका विषमुष्टिका।
निंबस्तिक्तो महाशीतः कृमिपित्तकफापहः
महानिंबः परग्राही कषायो रूक्षशीतलः।।

6. निंबी (കോവൽ)

बिंबीरक्तफला घोटा तुण्डिकेरी च तुण्डिकः
ओष्टोपमफला तुण्डी पाके रक्तफला च सा।
रसे पाके च मधुरा पित्तघ्नी कामिलापहः
ऊष्मश्लेष्म करी तुण्डी शाकेषु वमने हिता।।

7. विशाला (പേക്കുമ്മട്ടി)

विशाला तु मृगोर्वारुर्गवाक्षी गजचित्भिटी।
गवादिनी स्थूलफला मृगभक्षेन्द्रवारुणी।।

8. चित्रफला (കാട്ടുവെള്ളരി)

विशालाऽन्याचित्रफला त्रपुसी मरुसंभवा
इन्द्रोर्वारुर्हस्तिदन्तीचित्रा देवी महाफला।

कफपित्तहरा लघ्वी तिक्ता कट्वी विपाकतः
कामिलो पाण्डुशमनी विज्ञेया सुरवारुणी।।

9. त्रपुस (തേറ്റാംപരല്)

त्रपुसं कतकं तिक्तं मूत्रलं हस्तिदीपनी
छद्राफनं मूत्रफलं पाण्डुपुत्री मुखप्रिया।
अष्ठीलानाहशमनी मूत्ररोधनिवारिणी
रसे पाके च मधुरा वमने त्रपुसा मता।।

10. कुटज (കുടകപ്പാല)

कुटजो वत्सकस्तिक्तो वृक्षको गिरिमल्लिका।
वरतिक्तः शक्रवृक्षः कुटजी नीलयष्टीका।।

11. कुटजबीज (കുടകപ്പാലയരി)

कुटजस्य च बीजानि कोटजानि कलिङ्गकाः
शक्रस्याह्वा इन्द्रयवाः भद्रकयवाः स्मृताः।
दीपनं पाचनं ग्राहि रक्तपित्तार्शसां हितम्
कृमिकुष्ठप्रशमनं कुटजं तिक्तकं रसे।।

12. मूर्वा (പെരുംകുരുമ്പ)

मूर्वा मधुरसा देवी पीलुपर्णी मधुस्रवा
देवश्रेणी मधुमती लघुपर्णी पृथक्दला।
रसे पाके च मधुरा ज्वरघ्नी पित्तनाशिनी
मुखदोषप्रशमनी मूर्वा मदविनाशिनी।।

13. देवदाली (ദേവതാളി)

जीमूतको देवदाली मूत्रदोषगरा हरी
वेणी लोमशपत्रा च कार्क्कोटाऽखुविषापहः।
विषघ्नी कटुका पाके रसे कफविनाशिनी
अर्शघ्नो जन्तुशमनी तीक्ष्णा जीमूतकी तथा।।

14. विडङ्ग (വിഴാലരി)

विडङ्गं कृमिजितो कृमिमोघं चित्रतण्टुलम्
कृमिशत्रुः कृमिहरं जन्तुघ्नं कृमिनाशनम्।
कफवातप्रशमनं शूलानाहार्त्तिनाशनम्
कृमिघ्नं कटुकं पाके विडङ्गं परिकीर्त्तितम्।।

15. विदुल (വഞ്ചി)

वेतसो विदुलोनाद्रो वञ्चुलो दीर्घपत्रकः।
नादेयो भूतवृक्षश्च तालो शंभुविषस्तथा।।

16. अन्याविदुल (ആറ്റുവഞ്ചി)

नदीकूलप्रियोऽन्यश्च सशीतो मेघपुष्पकम्
जलजातस्तोयकामो विदुलो जलसेकसः।
वृणवातप्रशमनो मूत्रकृच्छ्राश्मनाशनः
कषायो रसपाकाभ्यां वीर्योष्णो वञ्चुलो मतः।।

17. दहन (കൊടുവേലി)

चित्रको दहनो वह्निः शिख्यग्निः पावकोऽनलः
ज्योतिर्ज्वाला दीपसंज्ञा पाठिनो दद्रुनाशनः।

चित्रकोऽग्नि समः पाके शोफार्शः कृमिकुष्ठकृत्
कफवातप्रशमनो विधिना च रसायनः।।

18. दन्ती (നാഗദന്തി)

दन्ती निकूलकः चित्रा निकुंभ उपचित्रकः।
कूलोदुंबरपर्णी च विशल्या च गुणप्रिया।।

19. चित्रा (പിരപ്പെട്ടി/എലിച്ചെവി)

द्रवन्ती शंवरी चित्रा न्यग्रोधो मूषिकाह्वया
प्रत्यक्श्रेणी वृषैरण्डा ततः श्रेण्याखुकर्णिका।
चित्रकस्यूर्वमा पाके रसे दन्ती विरेचिनी
आनाहोदरशूलाघ्नी दीपनी प्लीहनाशिनी।।

20. कोशातकी (പീച്ചിങ്ങ)

कोशातकी यकृच्छिद्रा जालिनी कृतवेधना।
क्षेलस्तुतिक्ता घोटाङ्गी मृदङ्गफलिका च सा।।
राजा कोशातकी त्वन्या कर्क्कटी हस्तपर्णिका
धामार्गवः कोशफला महाजाली निरेकसा।
कफपित्तप्रशमनी कामिला पाण्डुनाशिनी
रसे पाके च कटुका लघ्वी कोशातकी मता।।

21. करञ्ज (ഉങ്ങ്)

करञ्जो नक्तमालश्च प्रकीर्यः पुष्पमञ्जरी ।
घृतपूती (तो?) गुच्छपुष्पस्तथा स्निग्धकरञ्जकः।।

22. चिरिविल्व (ആവിമരം)

उदकीर्यः करञ्जोऽन्यः कैडर्यो मातृनन्दनः
चिरिविल्वः पूतिकाह्वा पूतिको दन्तधावनः।
कृमिकुष्ठप्रशमनः प्लीहोदावर्त्तनाशनः
रसे पाके च कटुकः करञ्जोऽर्शोविनाशनः।।

23. पिप्पली (തിപ്പലി)

पिप्पली मगधा कृष्णा वैदेही चपला कणा
उपकुल्या मागधिका शौण्डी कोलोषणं कटुः।
श्लेष्मला स्वादुशीतार्द्रा गुर्वी स्निग्धा च पिप्पली
सा शुष्का विपरीताऽतः स्निग्द्धापुष्या रसे कटुः।।
स्वादुपाकानिलश्लेष्मश्वासकासापहारका।
न तामत्युपयुञ्जीत रसायनविधिं विना।।

24. पिप्पलीमूलं (തിപ്പലിമൂലം)

मागधं पिप्पलीमूलं कणामूलञ्च रूढकम्
ग्रन्थिकं चपलं मूलं कृष्णामूलं च शौण्डजम्।
गुल्मप्लीहोदरानाहशमनं शूलनाशनम्
उष्णवीर्यं वमिहरं मूलं पिप्पलिसंभवमम्।।

25. सैन्धवं (ഇന്തുപ്പ്)

सैन्धवं माणिमन्थं च नादेयं लवणोत्तममं
सिन्धूत्थं सिन्धुजं श्रेष्ठं लवणं विमलं वरम्।
सैन्धवं तत्र सुस्निग्धं वृष्यं हृद्यं त्रिदोषनुत्
लघ्वनुष्णं दृशपथ्यमविदाह्यग्निदीपनम्।।

26. सौवर्चल (സൗവർച്ചലം എന്ന ചവൽക്കാരം)

सौवर्च्चलन्तु रुचकं सुगन्धं हृद्यगन्धकम्
अक्षञ्च काललवणं मागधं कृष्णसंज्ञकम् ।
लघुसौवर्च्चलकञ्च सुगन्ध्युत्गारशोधनम्
कृष्णे सौवर्च्चल गुणा लवणे गन्धवर्जिताः ।।

27. विडं (വെടിയുപ്പ്)

विडं तु कृत्रिमं पाक्यं घुटिको लवणन्तथा
द्राविडं खण्डलवणं कृतकन्धूर्त्तमासुरम् ।
ऊर्ध्वाधशोधनं रुच्यं कफवातानुलोमम्
दीपनं शोषशूलघ्नं विष्टंभानाहशोधनम् ।।

28. सामुद्रलवणं (കറിയുപ്പ്)

सामुद्रलवणं प्रोक्तं त्रिकुटं वारिसंभवम्
औद्भिदं पार्थिवं भौम्यं भूम्योत्थं पृथिवीभवम् ।
विपाके स्वादु सामुद्रं गुरु श्लेष्मविवर्द्धनम्
सतिक्तकटुकक्षारं तीक्ष्णमुत्क्लेदिचौद्भिदम् ।।
विष्यन्दिलवणं सर्वं सूक्ष्मं सृष्टमलं मृदु
वातघ्नञ्चातितीक्ष्णोष्णं रोचनं कफपित्तकृत् ।
एतानि पञ्चमुख्यानि लवणानि निर्द्दिशेत्
सामान्येन तु विज्ञेयं लवणं पटुनामकम् ।।
सैन्धवं लवणं देयं लवणे निर्विशेषतः ।

29. यवक्षार (യവക്ഷാരമെന്ന പപ്പടക്കാരം)

यवक्षारो यावशूको यवजो यावशूकजः
स्वर्च्चिका स्वर्च्चिकाक्षारो सौघ्नी पाक्य सुगन्धिकः।
गुल्महृद्ग्रहणीपाण्डुप्लीहानाहगलामयान्
श्वासार्शः कफवातांश्च शमयेद्यावशूकजः।।
क्षारः सर्वः कफहरः तीक्ष्णोष्णो कृमिजित् लघुः।
पित्तास्रदूषणः पाकी छेद्यहृद्यो विदारणः ।।
अपथ्यः कटुलावण्याच्छुक्लौजः केशचक्षुषाम् ।

30. वचा (വയമ്പ്)

वचोग्रगन्धा जटिला षड्ग्रन्था हैमवत्यपि
शुक्लाऽन्या तीक्ष्णगन्धोग्रा रक्षोघ्नी लोमशाह्वया।
मेध्या कफहरा चैव तिक्ता कट्वी विपाकतः
उन्मादापस्मृतिहरा रक्षोघ्नी च वचा मता।।

31. सूक्ष्मैला (ചിറ്റേലം)

सूक्ष्मैला द्राविडी तुच्छा खल्वेला बहुला तुटीः।
क्षुद्रैला निस्सटी चन्द्रा गर्भविस्रंसिनी मता।।

32. बृहदेला (വലിയ ഏലം)

वद्रैला बृहदेला तु स्थूलैला तु सुगन्धिका
त्रिदिवा त्रिदिवोद्भूता पृथ्वीका गन्ध्यका पुटा।
दीपनी रोचनी रूक्षा सुगन्धी पित्तकोपिनी
आस्यवैरस्यशमनी च एला गर्भविशोधनी।।

33. रेणुका (രേണുകം എന്ന ഏലത്തിൽ ഒരുവക)

हरेणु रेणुका कौन्ती पाण्डुपुत्री बृहत्तुटी
कपिलैला राजपुत्री मदनी चक्रचित्भिटी।
उष्णवीर्या रसे तिक्ता कौन्ती कफविनाशिनी
दीपनी पाचनी मेद्ध्या कृमिघ्ना गर्भपातनी।।

34. सर्षपा (ചെറുകടുക്)

सर्षपा दुन्दुभा गौरा सिद्धार्था भूतनाशना।
ग्रहघ्ना कटुकाश्वेता रक्षोघ्नी विजयावहा।।

35. रक्तसर्षपा (പെരുങ്കടുക്/ചെങ്കടുക്)

आसुरी राजकात्वन्या चित्रला रक्तसर्षपा
सुतीक्ष्णा कटुका तीक्ष्णगन्धा सूक्षवद्धूक्षवा।
दीपनी कटुकः पाके कृमिघ्ना शूलनाशिनी
रक्षोघ्नी सर्षपाकी मंगल्या बालके हिता।।

इति मदनादिनिघण्टौ प्रथमो गणः

द्वितीयो गणः

निकुंभकुंभत्रिफलागवाक्षीस्नुक्शंखिनी नीलिनितिल्वकानि ।
शम्याककंपिल्यकहेमदुग्द्धा दुग्द्धं च मूत्रं च विरेचनानि ।।

1. कुम्भ (ത്രികോല്പക്കൊന്ന)

दन्ती गतात्री पुत्री भद्रत्रिवृता कुंभ कुटरणाऽहिनी
सर्वाभूः त्रिपुटा श्यामा कठिका सफला तथा।
कषायमधुरा रूक्षा विपाके कटुका त्रिवृत्
श्लेष्मपित्तप्रशमनी रौक्ष्याच्चानिलकोपिनी ।।

2. त्रिफला (ത്രിഫല)

त्रिफलेति समाख्याता पथ्याधात्रीविभीतकैः
सातूत्तमा वरा श्रेष्ठा फलत्रय फलत्रिकम्।
कुष्ठश्चित्रेषु जत्रूर्ध्वरोगिणाञ्च प्रमेहिनाम्
त्रिफला सर्वदोषघ्नी कफपित्तविनाशिनी ।।
रसायनी नेत्रहिता तर्पणश्च्योतनाञ्जनैः।

3. हरीतकी (കടുക്ക)

हरीतक्यभया पथ्या प्राणदा विजया शिवा
अव्यथा पूतनाऽमोघा चेतकी प्रमथाऽमृता।
कफवातप्रशमनी भेदिनी दीपनी लघु
हर्शोगुल्माहितारुच्या जठरघ्नी हरीतकी ।।

4. आमलक (നെല്ലിയ്ക്ക)

धात्रीफलञ्चामलकं जातीरसफलाशिवम्
कोलं लाक्षामृतफलं त्रिफलञ्चामृतोद्भवम्।
कफपित्तहरा वृष्यामम्लामामलकन्तथा
भेदा मधुरं पाके रुच्यो वीर्यो हिमं मृदु।।

5. विभीतक (താന്നിയ്ക്ക)

विभीतकः कर्यफलः कलिवृक्षः कलिद्रुमः
वासन्तको भूतावासो हरीरक्षो वनप्रियः।
चक्षुष्यं केशजननो वीर्येणोष्णो विभीतकः
स्वर्यः कफहरः कासश्वासहिक्काप्रणाशनः।।

6. वज्रकण्टक (ഇലക്കള്ളി)

गवाक्षी गुडो महावृक्षो गण्डीरो वज्रकण्टकः
स्नुही समन्त दुग्धः स्नुग्वनिंस्त्रिशपत्रकः।
सर्वोदरप्रशमनी गरदोषहरी कटुः
वीर्योष्णं कफवातघ्नी स्नुही वह्निसमा वरा।।

7. शंखिनी (ശംഖുപുഷ്പി)

शंखिनी तिक्तला विश्वा यवतिक्ताक्षिपीडिकः
बहुफेना बहुरसा दृढपादा विसर्पिणी।
उदरानाहशमनी त्रिदोषघ्नी विषापहा
रसे पाके च कटुका शंखिनी समुदाहृता।।

8. नीलिनी (നീലി എന്ന അമരി)

नीलिनी नीलिका काला नीलीतूणी विशोधनी
ग्राम्या तुच्छा नीलपुष्पी चारटी भारवाहिनी ।
भेदिनी भूतसम्मोहहारी श्लेष्मानिलापहा
नीलिनी गरदोषघ्नी प्लीहोदावर्त्तनाशिनी ।।

9. लोद्‌ध्र (പാച്ചോറ്റി)

लोद्‌ध्रस्तिरीटश्शिखरी तिल्वकश्शावरश्शुकः ।
घनत्वक्का बृहल्लोद्‌ध्र पट्टी वदी शावरपादपः ।।

10. श्वेतलोद्‌घ्र (വെളുത്ത പാച്ചോറ്റി)

अन्यो लोद्‌ध्रः शावरकः श्वेतलोद्‌ध्रोऽक्षिभेषजः
जीर्णपुच्छो बृहत्पत्री क्रमुकस्थूलवल्कलः ।
चक्षुष्यः कफवातघ्नस्सर्वनेत्रविकारजित्
असृग्दरातिसारघ्नो रोचनो लोद्‌ध्र इष्यते ।।

11. कर्णिकार (കൊന്ന)

आराग्वधो राजवृक्षः शम्याकः चतुरंगुलः
कर्णिकारो व्याधिघातः कृतमालोऽथ रैवतः ।
रक्तपित्तहरः स्रंसी मृदुर्मधुरशीतलः
सुकुमारो शिशौ वृद्धेः राजवृक्षो विरेचनः ।।

12. कंपिल्यक (കമ്പിപ്പാല)

कंपिल्यको रजनिको रेचनो रक्तचूर्णकः
रक्तांगो रक्तशमनो विरेको व्रणशोधनः ।

कृमिघ्नः कफपित्तघ्नो रेचनो व्रणशोधनः
गुल्मे गरे विषे शस्ते कंपिल्यो मेहहाग्निकृत्।।

13. हेमदुग्धा (മഞ്ഞപ്പാൽ)

स्वर्णक्षीरी हेमदुग्धा हेमक्षीरी च काञ्चनी
हिमावती स्वर्णदुग्धा हेमाह्वा तिक्तदुग्धिका।
उत्तेजिनी प्रमदिनी भेदिनी हेमदुग्धिका
.... ।।

14. गोक्षीरं (പശുവിൻപാൽ)

क्षीरं दुग्धं पयोज्ञेयं स्त्रीणान्तत् स्तन्यमुच्यते
क्षीरशब्देन विज्ञेयं गोक्षीरं तत्र तत्र च।
स्वादु पाकरसं स्निग्धमोजस्यं धातुवर्द्धनम्
वातपित्तहरं वृष्यं श्लेष्मलं गुरु शीतलम्।।

15. नवनीतं, घृतं (വെണ്ണയും നെയ്യും)

दधिमण्डस्तु मस्तु स्यात् नवनीतन्तु मन्थजम्
तथा हैय्यंगवीनं च सर्पिराज्यं घृतं हविः।
उदश्विन्मथितं तक्रं कालशेयं विलोलितम्
दण्डहतं गोरसं च तत्फेनं कण्डसंज्ञकम् ।।

16. जलवर्जितं तक्रं (വെള്ളം കൂടാതെ കലക്കിയ മോര്)

सरसं निर्जलं घोलं मथितं जलवर्जितम्।

17. अर्द्धजलं तक्रं (പാതിവെള്ളം കൂടിയത്)

पादोदकमुदस्विच्चतक्रमर्द्धजलं भवेत् ।

18. गोमूत्रं (ഗോമൂത്രം)

गोमूत्रं गोमयं गोपु ब्रह्मांबु मूत्र एव च ।
शेषाणिसप्तमूत्राणी बोद्धव्यानि स्वसंज्ञया ।

19. करीषं (ചാണകം)

गवादीनाशकृद्विष्ठा करीषं छगणं विषा ।
मूत्रं गोजाविमहिषी गजाश्वोष्ट्रखरोद्भवम्
पित्तलं रूक्षतीक्ष्णोष्णं लवणानुरसं कटु ।
कृमिशोफोदरान्नाह शूलपाण्डुकफानिलान्
गुल्मारुचिविषाश्वित्र कुष्ठार्शांसिजयेल्लघु ।।

इति मदनादिनिघण्टौ द्वितीयो गणः

तृतीयो गणः

मदनकुटजकुष्ठा देवदाली मधुकवचादशमूलारुरास्ना।
यवमिसीकृतवेधनं कुलस्थो मधुलवणं त्रिवृता निरूहणानि।।

1. कुष्ठ (കൊട്ടം)

निकुष्ठमूलकुष्ठञ्च वाप्यं कापालभाव्यकम्
आमयोऽथ गदो रोगः त्वग्दोषो वाप्यसंज्ञकः।
कुष्ठं तिक्तकटूष्णं स्यात् त्रिदोषशमनं परम्
तृड्वीसर्पविषं तन्द्रा कण्डूकुष्ठञ्चनाशयेत् ।।

2. विल्व (കൂവളം)

विल्व शलाटुः शाण्डिल्यः पूतिवातो महाफलः
श्रीफलो हृद्यगन्धश्च बालविल्वश्च कर्कटः।
कफवातहरो रूक्षो रसे तिक्तकषायकः
पूत्यपानः फले विल्वस्संग्राही वह्निदीपनः ।।

3. काश्मर्य (കുമ്പിൾ)

काश्मर्यभीरा श्रीपर्णी काश्मर्यः कट्फलन्तथा
कम्भारी सर्वतोभद्रा सफला कृष्णवृन्तिका।
केश्या त्रिदोषशमनी कषायमधुरा रसे
रसायिनी भेदिनी च मेध्या श्रीपर्णिका मता।।

4. अरणी (മുഞ്ഞ)

अग्निमन्थोऽग्निमथनस्तर्कारी वैजयन्तिका ।
वह्निमन्थोऽरणी केतुर्जया पावकमन्थनः।।

5. अरण्यका (കാട്ടുമുഞ്ഞ)

तर्कार्यन्या वैजयन्ती वह्निनिर्मन्थिनी जया
अरण्यका जयन्ती च विजया च जयावहा।

....

तर्कारी सर्वदोषघ्नी तिक्ता लेपोपनाहिनी।।

6. पाटला (പാതിരിമരം)

पाटला श्वेतवर्णा च ज्ञेया सा काष्ठपाटला
निर्दिष्टा शतकुंभीका कुबेराक्षी फलेरुहा ।
पाटली कृष्णवृन्ता च स्थाल्या मेघांबुवाहिनी
ताम्रपुष्पी च कुंभीका कुसुमा कामदूतिका।।
फलपुष्पोपयोगेन हिक्काकासहरः कटुः।
पाटली स कषायन्तु.. तिक्ता कफापहा।।

7. श्योनाका (പലകപ്പയ്യാനി)

श्योनाको दीर्घवृन्तश्च डुंडुको भूतवृक्षकः
मयूरजंघो भल्लूकः कट्वंगोऽरलुकस्तथा।
चिरन्तनातिसारघ्नः पुटवाकप्रयोगतः
कफवातहरः स्निग्धः कषायो डुंडुकः स्मृतः।।

ഇവ അഞ്ചും ബൃഹത്പഞ്ചമൂലം

8. बृहती (ചെറുവഴുതിന)

बृहती बहुपत्रा च कण्टकी स्थूलकण्टकः
महावार्त्ताकिनी सिंही महती बहुकोटिका।

कृमिकुष्ठप्रशमनी कण्टू वातकफावहा
अरोचकास्यवैरस्यमलघ्नी बृहती मतः ।।

9. धावनी (കണ്ടകാരി)

कण्टकारी कण्टकिनी धावनी दुष्प्रधर्षिणी
व्याघ्री निदिग्धिका क्षुद्रा वार्त्ताकी क्षुद्रकण्डकी।
कासश्वासहरा रूक्षा भेदिनी दीपनी लघु
कफापहा पीनसघ्नी क्षुद्रा वार्त्ताकिनी मता ।।

10. सालपर्णी (മൂവില)

सालपर्णी त्वतिगुहा महाक्लीतनिका स्थिरा
विदारिगन्धांशुमती ध्रुवापर्णी त्रिपर्ण्यपि।
वातघ्नी बृंहणी वृष्या क्षयकासज्वरापहा
रसायनी स्वादुरसा सालपर्ण्यतिसारजित् ।।

11. पृश्निपर्णी (ഓരില)

पृश्निपर्णी पृथक्पर्णी गुहा क्रोष्टुकपुच्छिका
सृगालविन्ना लांगुली क्लीतनी कलशीत्यापि ।
पृश्निपर्णी रसे स्वादुर्लघुरुष्णा त्रिदोषजित्
दीपनी ज्वरतृड्दाहश्वासकासविनाशिनी ।।

12. गोक्षुर (ഞെരിഞ്ഞിൽ)

गोक्षुरस्यात् गोक्षुरकः कण्टकस्वादुकण्टका
....।

मूत्रकृच्छ्रानिलहरो वस्तिवातनिवारणः
वृष्यस्स्वादुरसश्शीतो गोक्षुर श्वासकासजित्।।

ഇവ അഞ്ചും ലഘുപഞ്ചമൂലം

बृहद्ध्रस्वं पञ्चमूलं दशमूलं प्रकीर्त्तितम् ।
योज्यमाद्यं पञ्चमूलं सामान्योक्तौ विशेषतः।।

शेषाणि पञ्चमूलानि निर्द्दिष्टानि पृथक् पृथक् ।

13. देवदारु (ദേവതാരം)

देवदारु भद्रदारु काष्ठदारु च दारु च
देवकाष्ठं भद्रकाष्ठं सुरदार्विन्द्रदारु च।
कफवातहरस्निग्धोहिक्काकासहरः कटुः
सुगन्धी पीनसश्वासान् देवदारुर्नियच्छति।।

14. रास्ना (അരത്ത)

रास्ना युक्ता गन्धमूला सुवहा सुरसा रसा
सुगन्धाऽतिरसा रस्या रसना गन्धनाकुली।
विशेषाद्वा रोगघ्नी तैलादिषु नियोजिता।
विषघ्नी श्वासकासघ्नी रास्ना हिक्कानिवारिणी।।
उत्तरप्रदेशे प्रसिद्धः।

15. यवा (യവനെല്ല്)

यवाप्रोक्ता तीक्ष्णशूका पवित्रा वाजिनां प्रियाः।
अक्षताश्च परूलाश्च तेषां धान्यां बुधैः स्मृतः।।

16. यवफल (മുളയരി)

रूक्षश्शीतो गुरुस्स्वादुस्सरोविड्वातकृद्यवः
वृष्य स्थैर्यकरो मूत्रमेदः पित्तकफञ्जयेत्।
पीनसश्वासकासोरुस्तंभकण्ठत्वगामयान्
न्यूनो यवादवयवो रूक्षोष्णो वंशजो यवः।।

17. शतपुष्पा (ശതകുപ്പ)

शतपुष्पामिसिश्शीर्षा शताह्वा कारवी शिफा
अवाक्पुष्पी मधुरसा च्छत्रां संहितपत्रकः।
लघूष्णा कटुका पाके कफवातनिबर्हणी
अन्नगन्धहरा रुच्या शाकसौगन्ध्यदामिसिः।।

18. कुलस्था (മുതിര)

कुलस्था ताम्रवर्णीच कालवृन्ताश्च लापहाः
कुलकाश्च कलाश्चैव शमिजाः शिंबिकास्तथा।
अम्लपित्तहराश्चोष्णा कुलस्था स कषायकः
अश्मघ्नः पीनसश्वासकासघ्नेस्सकफापहाः।।

19. माक्षिकं (തേൻ)

माक्षिकं सारघं क्षौद्रं मधुपुष्परसोद्भवम्
माक्षिकं पौद्रिकं क्षौद्रं भ्रामरं मधुजातयः।
माक्षिकं तैलवर्णं स्यात् श्वेतं भ्रामरमुच्यते
क्षौद्रन्तु कापिलं विद्यात् घृतवर्णं तु पौष्पिकम्।।
सिक्थकं वीर्यसं सिक्थं मधूच्छिष्टं मधूषितम्।
मधुशेषं मदनकं मधुजं माक्षिकाश्रयम्।।

20. मधूच्छिष्टं (മെഴുക്)

....

कुष्ठमेहकृमिच्छर्दिश्वासकासातिसारजित् ।

व्रणशोधनसन्धानरोपणं वातलं मधु

रूक्षं कषायमधुरं तत्तुल्या मधुशर्करा ।।

21. शर्करा (പഞ്ചസാര)

शर्करा तु सिता शुभ्रा शुक्लश्वेतसिताह्वया ।

मत्स्यण्डिकाऽन्या फुल्लश्च तथाऽन्या मधुशर्करा ।।

22. मत्स्यण्डि (കൽക്കണ്ടം)

वृष्या क्षीणक्षतहिता रक्तपित्तानिलापहा

मत्स्यण्डिकाखण्डसिताः क्रमेण गुणवत्तराः ।

.... ।

दाहतृक्च्छर्दिमूर्च्छासृक्पित्तघ्न्यस्सर्वशर्कराः ।।

इति मदनादिनिघण्टौ तृतीयो गणः

चतुर्थो गणः

वेल्लापामार्गव्योषदार्वीसुराला
बीजं शैरीषं बार्हतं शैग्रवं च।
सारो माधूकः सैन्धवं तार्क्ष्यशैलम्
तुत्थौ वृत्थीका शोधयान्त्युत्तमाङ्गम्।।

1. अपामार्ग (കടലാടി)

वेल्लापामार्गश्शैखरीक प्रत्यक्पुष्पी मयूरकः।
खरमञ्जर्यधः शल्यः क्षुधाधामार्गवस्तथा।।

2. खरमञ्जरी (വലിയ കടലാടി)

कफमेदोनिलहरः छेदनस्रंसनस्तथा।
रसे पाके च कटुका वीर्योष्णा खरमञ्जरी।।

3. व्योष (ത്രികടു)

शुण्ठीमरीचै च पिप्पली समैरेकत्र मिश्रितैः
त्रिकटुत्यूषणं व्योषं कटुत्रयकटुत्रिकम्।
कटुत्रयं कटुरसं वीर्योष्णं छेदनं जयेत्
स्थौल्याग्निसदनश्वासकासश्लीपदपीनसान् ।।

4. शुण्ठी (ചുക്ക്)

शुण्ठीमहौषधं विश्वं नागरं विश्वभेषजम्
विश्वौषधं श्रृङ्गिवेरं महीच्छत्रकमूषणम् ।
नागरं दीपनं वृष्यं ग्राहि हृद्यं विषबन्धनुत्

रुच्यं लघु स्वादुपाकं स्निग्धोष्णं कफवातजित् ।।
तद्वदार्द्रकमेतच्च कणाया गुण ईरितः ।

5. मरिच (മുളക്)

मरिचं वल्लिजं कृष्णमूषणं कुञ्चितं कटु
यवनेष्टा कृमिहरं तीक्ष्णं चीनप्रियं घनम् ।
....
रसेपाके च कटुकं कफघ्नं मरिचं लघु ।।

6. चातुर्जातकं (ചാതുർജ്ജാതകം/ചതുർജ്ജാതം)

त्वगेलापत्रस्तुल्यो त्रिसुगन्धं त्रिजातकम् ।
नागकेसरसंयुक्तं चातुर्जातकमुच्यते ।।

7. हरिद्रा (മഞ്ഞൾ)

अन्यर्कपिण्डा हरि तु गौरी वर्णवती निशा
पीतिका रजनी पीता हरिद्रा वरवर्णिनी ।
दीपनं रोचनं रूक्षं पीनसघ्नं च पित्तलम्
तीक्ष्णमुष्णं चतुर्ज्जातं सुगन्धं कृमिनाशनम् ।।

8. दारुहरिद्रा (മരമഞ്ഞൾ)

दार्वी दारुहरिद्रा स्यात् पर्जन्या पचा पचा
कटं कटेरी रजनी रात्रिर्द्दारु निशा क्षपा ।
कटुतिक्ता निशामेहा कुष्ठपित्तकफापहा
प्रलेपाजयन्ति कण्डूं शोफं दुष्टव्रणं विषम् ।।

9. सर्जरस (സർജ്ജരസം എന്ന ചഞ്ചല്യം/ചെഞ്ചല്യം)

देवधूपः सर्जरसो बहुधूपोऽग्निवल्लभः
सुराला सालनिर्यासः सुधूपो यक्षधूपकः ।
अग्निदग्धापहश्लेष्मपित्तघ्नो व्रणशोधनः
सुगन्धं तैलयोगे च ज्ञेयं सर्जरसो बुधैः ।।

10. शिरीष (വാകമരം)

शिरीषो मधुपुष्पैश्च वृत्तपुष्पो शुकप्रियः
भाण्डी शुकाभ्रपुष्पश्च चक्षुपुष्पो विषापहः ।
कफपित्तहरश्चैव विषव्रणविशोधनः
शीतवीर्यो विसर्प्पघ्नो शिरीषो मधुरो रसैः ।।

11. शिग्रु (വെള്ളമുരിങ്ങ)

शिग्रुर्हरीतशाकोऽन्यो मतो मूलकपत्रकः ।
घनच्छदस्तीक्ष्णगन्धो मुरिंगी शालनक्षमः ।।

12. शिग्रुक (കരിമുരിങ്ങ)

सौभञ्जनः कृष्णगन्धो मुखभंगोऽथ शिग्रुकः ।
रूक्षलश्चाग्निमूलश्च पाणश्वासौ गुडो मतः ।।

13. मधुशिग्रु (കാട്ടുമുരിങ്ങ)

तृतीयो मधुशिग्रुस्यान्मधुरः सिंहकेसरी
शिग्रुश्च शिग्रुकश्चान्यो मधुशिग्रुरिति त्रयम् ।
रसासृक् पित्तशमनः प्लीहघ्नः क्रिमिहा लघुः
तिक्तवीर्यो हिमं शिग्रु चक्षुष्यो विद्रधे हिता ।।

14. गुडपुष्पक (ഇരിപ്പ)

मधूकस्तीक्ष्णसारश्च मधुपुष्पो महाद्रुमः ।
डोलाफलो मधुष्ठीलो मधुरो गुडपुष्पकः ।।

15. मधूक (കാട്ടുഇരിപ്പ/കാട്ടിരിപ്പ)

ज्ञेयो मधूकसंज्ञाभिर्मधूलो नातिमिश्रितैः
छदैर्ह्रस्वतरैः पुष्पैः तुल्यस्तु रसवीर्यता ।
तीक्ष्णोष्णः कफवातघ्नो मधूकस्सारत स्मृतः
पुष्पैस्तु मधुरः पित्तं शमयेत् तैलतोऽनिलम् ।।

16. तार्क्ष्यशैल (അഞ്ജനക്കല്ല്)

रसाञ्जनं तार्क्ष्यशैलं दार्वीक्वाथसमुद्भम्
तार्क्ष्यञ्च बालभैषज्यं कृत्रिमं कृतकाकृतम् ।
कफघ्नं तिक्तकटुकं भेदि सोष्णं रसाञ्जनम्
श्लेष्मपित्तातिसारघ्नं वृणघ्नं वक्त्ररोगजित् ।।

17. हिंगुपत्रि (ഹിംഗുപത്രമെന്ന സോമനാദികായം)

हिंगुपत्री च पृथ्वीका बाष्पिका पृथुका पृथुः
कारवी दीर्घिका तन्वी नाडीहिंगुशिवाटिका ।
सुगन्धा कृमिहृद्रोग वातश्लेष्मरुजापहः
रुच्यं हृद्यं गुल्महितं हिंगुपत्रं रसे कटुः ।।

इति मदनादिनिघण्टौ चतुर्थो गणः

पञ्चमो गणः

भद्रदारु नतं कुष्ठं दशमूलं बलाद्वयम्।
वायुं वीरतरादिश्च विदार्यादिश्च नाशयेत्।।

1. तगरं (തകരം)

तगरं कुटिलं पत्रं नतं कालानुसार्यकम्
जिह्मं बर्हणकं वक्रं शक्रं च नहुषप्रियम्।
उष्णं कटुरसं पाके कटु गन्धगुणाधिकम्
कफवातहरं पत्रं बहुतैलादियोजितम् ।।

2. बला (കുറുന്തോട്ടി)

बला भद्रादिनी कूला समा सिंहितकूलका
ओदनाह्वं प्रभार्या च ऋष्या वाट्यालकस्तथा।
रसे पाके च मधुरा वातशोणितनाशिनी
स्निग्द्धक्षवप्रमाशीत बलाधातुविवर्धिनी।।

3. अतिबला (അതിബലമെന്ന വെള്ളൂരകം)

ऋष्यप्रोक्तात्यतिबला भारद्वाजी सुकर्णिका
वाट्यायनी भूरिबला बलिनी शीतपुष्पिका।
रसे पाके च मधुरा पुष्यातिसारनाशिनी
सितवीर्यात्यतिबला स्निग्धावातास्रनाशिनी।।

इति मदनादिनिघण्टौ पञ्चमो गणः

षष्ठो गणः

दुर्वानन्ता निंबपाशात्मगुप्ता गुन्द्राभीरुः शीतपाकी प्रियंगुः।
न्यग्रोधाद्यः पद्मकादिस्थिरे द्वे पद्मं वन्यं शारिबाादिश्च पित्तम्।।

1. नीलदूर्वा (കരിങ്കറുക)

शाड्वलंस्यान्नीली दूर्वा गोलोमी शतपर्विका।
हरिता शतवीर्या च शतवल्यं सिता मता।।

2. श्वेतदूर्वा (വെളുത്ത കറുക)

श्वेतदूर्वा तु गोलोमी श्वेतगन्धा सिता लता।
सहस्रवीर्याऽनन्ता च दुर्म्मना भार्गवी रुहा।।

3. गन्धदूर्वा (കറുക)

गन्धदूर्वा तु गन्धाली तीव्रमत्स्याक्षिकाऽपि च
बाह्ली नालीकलायाश्च वारुणी शकुलाक्षिका।
वीर्ये हिमा पित्तहरा विसर्पध्नी ज्वरापहा
रक्तप्रसादिनी ज्ञेया दूर्वा सञ्जीवनी वरा।।

4. अनन्ता (വെങ്കൊടിത്തൂവ)

मेषको दीर्घमूलश्च समप्रान्तोमरुद्भवा।
अनन्तो दूरमूलश्च बालपत्रो विकण्टकः।।

5. धन्वयाष (ചെങ്കൊടിത്തൂവ)

दुरालभाधन्वयाषधन्वयाषक कच्छ्शुराः
ताम्रमूली च दुस्पर्शी रोदनी स्यात् कणाशन।
रक्तप्रसादिनी ज्ञेया विसर्पज्वरकुष्ठजित्
वातरक्तहरा ज्ञेया कफास्रघ्नी दुरालभा।।

6. अटरूषक (ആടലോടകം)

वाशाविषा सिंहमुखी भिषङ्वाताऽटरूषकः
सिंहिका सिंहपर्णी च रक्तपित्तप्रसादिनी।
ऊर्ध्वासृक्पित्तशमनी कफकासज्वरापहा
कषायतिक्ता वीर्योष्णा सितावाशाक्षयापहा।।

7. मर्कटी (നായ്ക്കരണ)

कपिकच्शूश्चात्मगुप्ता स्वयंगुप्ता च मर्कटी
कण्डूकर्यजहा गुप्ता कपिलोमा च कछ्शुरा।
मूत्रकृच्छ्रहराशीता गुन्द्रा पाषाणभेदिनी
वृष्या स्निग्द्धा पित्तहरा तथा रक्तप्रदादिनी।।

8. शतावरी (ശതാവരി)

शतावरी सूक्ष्मपत्राऽभीरुरिन्दीवरी वरी
बहुमूलो द्विपिशिता शतमूलो हि जिह्विका।
बातपित्तहरा वृष्या वाल्या शीता रसायिनी
स्वादुः शतावरीतैलघृतयोगेषु पूजिता।।

9. गुञ्जा (കുന്നി)

कृष्णकांबोजिकां गुञ्जा रक्तिका काकनन्तिका
चूडामणिश्शीतपाकी शिखण्डी कृष्णलालका ।
द्वितीय श्वेतकांबोजी दुर्मुखा काकपीलुका
काकादिनी काकभिन्दी पजनालेपनादिभिः ।।

10. प्रियंगु (ഞാഴൽ)

प्रियंगुः फलिनी श्यामा वनिता वल्लभा लता
भंगुरा वेल्लगिरिका प्रियाह्वा वर्णभेदिनी ।
रक्तसंग्रहणी शीता सुगन्धा पित्तनाशिनी
वश्योपयोगिनी वृष्या प्रियंगुर्गुह्यरोगजित् ।।

11. श्वेतपुण्डरीकं (വെൺതാമര)

श्वेतवत्या पुण्डरीकं शतपत्रं सरोरुहम् ।
श्वेतपुष्पं तामरसं सरोजांबुजपङ्कजम् ।।

12. रक्तकमलं (ചെന്താമര)

द्वितीयं पुष्करारक्तमरविन्दं कुशेशयम् ।
कमलं नलिनं चैव श्रीनिकेतं मनोरवम् ।।

13. नीलोत्पलं (നീലത്താമര)

सौगन्धिकं रक्तनीलं कर्णपूरं दरोत्पलम् ।
नीलोत्पलं कुवलयं नीलोब्जमसितोत्पलम् ।।

14. कल्हारं (ആമ്പൽ)

जात्युत्पलं कोकनदं कल्हारं गन्धसेमकम्।

15. श्वेतजलजं (വെളുത്ത നൈതൽ കിഴങ്ങ്)

कुमुदं श्वेतजलजं चन्द्रकान्तं शशिप्रियम्।
सितोत्पलं गर्द्दभं श्यामवृन्तं जलेरुहम्।।

16. पद्मिनी (താമരസമൂഹം എന്ന താമര)

पद्मिनी स्यात् पुटकिनी नलिनी च कुमुद्वती।

17. पद्मकेसरं (താമരയല്ലി)

केसरं पद्मकिञ्जल्कं आपीतः पद्मकेसरम्।

18. पद्मपराग (താമരപ്പൊടി)

मकरन्दः परागश्च तुंगो गौरश्च काञ्चनः।

19. पद्मकार्णिका (താമരക്കാ)

स्यात् कर्णिका बीजकोककर्णी पद्मकर्णिका।

20. पद्मबीजं (താമരക്കുരു)

पद्मबीजं तु पद्माक्षं रजः पद्माधिकं मधु
कषाय मधुरश्शीतः पद्मपीनं कफास्रनुत्।
अलक्ष्मीनाशनं पर्ण्यं रक्तातिसारनाशनम्
नीलोत्पलन्तु चक्षुष्यं अञ्जनं तिमिरापहम्।।

रक्तोत्पलं हितं गर्भे रक्तसंग्रहणीषु च।
संबीजनालमूलानि सर्वेषां सगणानि तु।।

21. परिपेलवं (ചണ്ഡക്കിഴങ്ങ്/ചണ്ണക്കിഴങ്ങ്)

कुटं नटं प्लवं वन्यं शुकाह्वं परिपेलवम्
जीर्णबुध्नं वातपुरं वितुन्नं वेल्लवं पुटम्।
कषायतिक्तानुरसं कफपित्तास्रनाशनम्
शीतवीर्यं विसर्पघ्नं विशेषात् परिपेलवम्।।

इति मदनादिनिघण्टौ षष्ठो गणः

सप्तमो गणः

जीवन्ती काकोल्यौ द्वे मेदे मुद्गमाषपर्ण्यौ च।
ऋषभक जीवक मधुकञ्चेति गणो जीवनीयाख्यः।।

1. जीवन्ती (അടകൊതിയൻ)

जीवन्ती जीवनी जीवा जीवनीया मधुस्रवा
जीवनीया तु मंगल्या ज्ञेयाऽन्याश्रीकिरीटिका ।
कूर्च्चशीर्षो मधुकरः शाकश्रेष्टा यशस्करी
नेत्ररोगहरा शीता पित्तासृक् कफनाशिनी ।।
रसायनी जीवनीया जीवन्ती मधुरारसे।

2. काकोली (കാകോളി)

काकोली कपटी काणं ध्वाङ्क्षोली क्षीरशुक्लिकः।
शुक्लक्षीरा वायसोली धीरा वीरा पयस्विनी।।

3. क्षीरकाकोली (ക്ഷീരകാകോളി)

द्वितीया क्षीरकाकोली शूरा वीरा विकाणिका
.... ।
वातपित्तहरा शीता बृंहणी क्षयशोषजित्
तथैव क्षीरकाकोली पूर्वस्मादधिकं गुणैः।।

4. मेदा (മേദാ)

मेदा मेदसमुद्भूता शल्य पर्णधराऽपि च।
मणिच्छिद्रा देवमणी सुरमेदसमुद्भवः।।

5. महामेदा (മഹാമേദാ)

महामेदा वृक्षरुहा महापुरुषदन्तिका
विभावरी या पर्यायैः मेदायाः परिभाषिता।
बृंहणो पुष्पपातासृक् पित्तघ्नौ स्तन्यवर्धनौ
मेदेधीते स्वादुरसे क्षतक्षयहरे गुरू।।

6. मुद्गपर्णी (കാട്ടുചെറുപയർ)

मुद्गपर्णी...... मार्जारिगन्धिका सहा ।
काकमुद्गा क्षुद्रसहा वनजा शिंबिरीटिका।।

7. माषपर्णी (കാട്ടുഴുന്ന്)

माषपर्णी सिंहविन्ना सूप्यपर्णी महासहा
पाण्डुरा माषपर्णी च कांबोजी कृष्णवृन्तिका।
ग्राहिण्यो रूक्षशीतश्च स्यात् मुद्गमाषद्विपर्णिनी
कफपित्तहरी तिक्ता स्तंभिन्यो दृक्प्रसादके।।

8. ऋषभ (വൃഷഭകം)

ऋषभः कुक्कुटी श्रीमान् विषाणी गोपतिर्वृषः।
वृषभो धुद्र्धुरो धीरः ककुद्मान् वृषभीपतिः।।

9. जीवक (ജീവകം)

जीवकः कूर्च्चशीर्षश्च दीर्घा सुस्थिरजीव्यपि

मंगल्यनामधेयं च ह्रस्वांगः प्रियसंज्ञकः।
जीवनीया गणस्वादुर्ज्जीवनो मधुरस्तथा
रक्तपित्तहरः शीतो बृंहणो केशवर्धनः।।
ऋषभो जीवकश्चैव गर्भसन्धानकारकौ।
ऋषभकजीवकौ गौडदेशे प्रसिद्धौ।।

इति मदनादिनिघण्टौ सप्तमो गणः

अष्टमो गणः

विदारि पञ्चांगुल वृश्चिकाली वृश्चीवदेवाह्वय सूप्यपर्ण्यः।
कण्डुकरी जीवनहृस्वसंज्ञे द्वे पञ्चके गोपसुता त्रिपादी।।
विदार्यादिरयं हृद्यो वृंहणो वातपित्तहा।
शोषगुलमांगमर्द्दोर्ध्वश्वासकासहरो गणः।।

1. विदारी (മുതക്ക്)

विदारीक्षु विदारी च वृष्यगन्धा फलाशिका।
गजवाजिप्रिया पुष्या स्वादुकन्दा विदारिका।।

2. क्षीरविदारी (പാൽമുതക്ക്)

अन्या क्षीरविदारीस्याद्विक्षु कन्देक्षुवल्यपि
क्षीरवल्ली क्षीरकन्दा शुक्लक्षीरा पयस्विनी।
विदारी वातपित्तघ्नी मूत्रला च सुशीतला
वृष्यारसायिनी शीता द्विपिण्डा गर्भदा च सा।।

3. पञ्चांगुल (ചിറ്റാവണക്ക്)

एरण्डश्चोरुपूगश्च चित्रो गन्धर्वहस्तकः।
आवण्डको वर्द्धमानः शुक्लः पञ्चांगुलः स्मृतः।।

4. हस्तिपर्णी (ചുവന്ന ആവണക്ക്)

रक्तोवरो हस्तिपर्णी व्याघ्रो व्याप्रकरो रिपु
ऊरुपूतो हस्तिपर्णी चञ्चुरक्तानुपत्रकः।
एरण्डौ द्वौ वातहरौ शूलोदावर्त्तनाशनौ
वातरक्तहरौ सर्व एरण्डो मार्गशोधनौ ।।

सतिक्तोषणमेरण्डं तैलं स्वादु सरं गुरु।
वर्धगुल्मानिलकफानुदरं विषमज्वरम् ।।
रुक्शोफौ कटीगुह्यकोष्ठ पृष्ठाश्रयौ जयेत्।

5. वृश्चिकाली (വൃശ്ചികാളി എന്ന തേക്കട)

वृश्चिकालीस्मृता.... कालीसर्पदंष्ट्रिका
उष्णधूम्रा च पुष्पा च विषाणी नक्रदंष्ट्रिका।
वातपित्तहरा शीता चक्षुष्या श्वासकासजित्
अंगमर्द्दहरा वृष्या गुल्मघ्नी च विषाणिका।।

6. वृश्चीवा (വെന്തഴുതാമ/വെൺ തഴുതാമ)

पुनर्न्नवो वर्षकेतुः सहामूलकपत्रकः।
श्वेतमूलोऽथ वर्षाभू वृश्चीवा क्षुद्रपत्रकः।।

7. क्षुद्रवर्षाभू (ചെന്തഴുതാമ)

पुनर्न्नवोऽन्यो वैशाखः रक्तवृन्तः कठिल्लकः
विकसत् क्षुद्रवर्षाभू रक्तपुष्पा सिनाडिका।
रसायिनी शोफहरः सकषायो सतिक्तकः
कफवातहरा ज्ञेया द्विविधा च पुनर्न्नवा।।

8. नागबला (നാഗബലാ എന്ന വെള്ളൂരകം)

विश्वदेवा नागबला झषा ह्रस्वं गवेधुका
परधान्यनिका कारा घोटा गांगलिका तथा।
सहर्षसफला धान्या मंगल्यार्त्थप्रसादिनी
वर्षपुष्पा महागन्धा देवदण्डोत्पलाह्वया।।

इति विदार्यादिगणं अष्टमम्

नवमो गणः

1. शारिबा (പാൽവള്ളി; നറുനീണ്ടി)

शारिबा शीतकाश्मर्य प्रतानिका लता।
स्फोता गोपवल्लिभिर्जीविका............।।
शारिबाऽन्या कृष्णला च कृष्णचन्दनशारिबा
भद्राचन्दनगोपा च चन्दनं कृष्णवल्ल्यपि।
तृष्णा दाहप्रशमनी रक्तपित्तहरा हिमा
ज्वरघ्नी मधुरा पुष्या शारिबा पित्तकासजित् ।।

2. हंसपादी (ഹംസപാദിയെന്ന ചെറുപുള്ളടി)

हंसपादी हंसपदी रक्तपादी मधुस्रवा
घृतमंडा त्रिपादी कीटदारी आलसेलका।
रक्तप्रसादिनी शीता दाहवत् सर्प्पनाशिनी
वृणघ्नी रोपणी गुर्वी हंसपादी विषापहा।।

3. उशीरं (രാമച്ചം)

उशीरं वीरणं सेव्यं अभयञ्च मृणालकम्
बहुमूलं शीतमूलं वीरं वीरणनामकम्।
ज्वरघ्नं पाचनं दाहतृष्णा मदविनाशनम्
रक्तपित्तहरं शीतमुशीरं मूत्रकृच्छ्रजित्।।

4. लामज्जक (ഇരിവേലി)

लामज्जकं दीर्घमूलं मृणालञ्चलाशयम्
इष्टकापथिकं शीतं योज्यं च क्षितितो लघु।

सुगन्धशीतलं वृष्यं मूत्रकृच्छ्रहरं लघु
वातपित्तहरं तिक्तं तैललेहे मृणालकम् ।।

5. गन्धसारं (ചന്ദനം)

चन्दनं गन्धसारञ्च गोशीर्षं श्वेतचन्दनम् ।
भद्रश्रियं मलयजं महार्हं शिशिरं सितम् ।।

6. रक्तचन्दनं (രക്തചന്ദനം)

रक्तचन्दनमप्यन्यं लोहितं रक्तचन्दनम् ।
चन्दनं ताम्रसारञ्च स रक्तं बलिचन्दनम् ।।

7. कालेयक (പീതചന്ദനം)

कालेयकं पीतसारं पीतवर्णञ्च शीतलम्
वर्णप्रसादजननं तृतीयं वर्णकृत्रिमम् ।
सर्वं सतिरक्तकटुकं चन्दनं शिशिरं परम्
वृष्यं हृद्यं सुगन्धं च रक्तपित्तहरं शुभम् ।।

8. परूषक (ചിറ്റീന്തൽ)

परूषकं मृदुफलो रोषणो धन्वनच्छदः
परोपरो नीलपर्णः परूषश्चातिमण्डुलः ।
वृष्यो हृद्यो रुचिकरः पित्तघ्नश्च परूषकः
सरोष्णो मधुरः पाके शीतवीर्योऽतिसारजित् ।।

इति नवमो गणः

दशमो गणः

पद्मकः पुण्ड्र वृद्धितुकर्ध्यश्शृंग्यमृता दश जीवनसंज्ञाः।
स्तन्यकरा ध्नन्ती रणपित्तं प्रीणनवृंहणजीवनवृष्याः।।

1. पद्मकं (പദ്മകം)

पद्मकं हेमपद्मञ्च कलशं शबलं तथा
पद्मवर्णः पद्मगन्धी पाटलावर्णपद्मकम् ।
तिक्तारसे महावीर्ये दाहतृड्ज्वरनाशनम्
रक्तपित्तविषघ्नञ्च पद्मकं लघुवातलम्।।
पद्मकं केदारदेशे प्रसिद्धः ।

2. प्रपुण्डरीकं (പ്രപുണ്ഡരീകം - കൽത്താമര)

प्रपुण्डरीकं चक्षुष्यं श्रीपुष्पं मूलसाधनम्।
पुण्ड्राह्वा पुण्डरीकञ्च नेत्राश्च्योतनसन्निभः ।।
प्रपुण्डरीकं उत्तरप्रदेशे प्रसिद्धः ।
शीतं नेत्रविकारघ्नं मधुरं रसपाकयोः।
कफपित्तहरं वृष्यं व्रणघ्नं पुण्डरीयकम्।।

3. वृद्धि (വൃദ്ധി)

वृद्धितुष्टिस्सुखं भूती राजीसर्वजनप्रिया
ऋषिसृष्टा वसुर्ल्लक्ष्मी मंगल्या मधुरा प्रिया।
रक्तपित्तहराशीता मधुरा रसपाकतः
बृंहणीया हिमा वीर्या वृद्धिर्गर्भविवर्द्धिनी।।

4. तुकाक्षीरी (മുളകല്ല്)

तुकाक्षीरी वंशभवा वंशजा तृणकेतनी
तवक्षीरी तुका शुभ्रा वंशजा वंशरोचनाः।
कषाय मधुरा रूक्षं कासघ्नी वंशरोचना
मूत्रकृच्छ्रक्षयश्वासकासघ्नी मधुरा हिमा।।

5. ऋद्धि (ഇരുത്തി)

ऋद्धिसिद्धिश्चेतनाच प्राणदा जीववर्द्धिनी
प्रचेतना बोधना च मुनिश्रेष्ठा यशस्विनी।
मूर्च्छाप्रणाशिनी बल्या प्राणस्थैर्यकरो गुरुः
पित्तवातहरा ऋद्धि जीवनीया त्रिदोषजित्।।

6. कर्कटशृंगी (കർക്കടശൃംഗി)

शृंगी कर्कटशृंगी च महाकोशा नतांगिका
कुलीरशृंगी च रसा नताङ्गी कर्कटशृंगी।
कासहिक्काक्षयश्वासकासघ्नी सकषायका
उष्णवीर्या हिता बालज्वरे कर्कटशृंगिका।।

7. गुडूची (അമൃതവല്ലി)

गुडूच्यामृतवल्ली च छिन्नाछिन्नरुहामृता
मधुपर्णी वयस्थाच कुण्डली सोमवल्यपि।
तिक्तामृता त्रिदोषघ्नी ग्राहिण्युष्णा रसायनी
दीपनीज्वरतृक्दाहकामिला रक्तवातनुत्।

इति दशमो गणः

एकादशो गणः

परूषकं वरा द्राक्षाकड्फलं कतकात्फलम् ।
राजाह्वं डाडिमं शाक तृण्मूत्रामयवातजित् ।।

1. द्राक्षा (ദ്രാക്ഷാ എന്ന മുന്തിരിങ്ങാപ്പഴം)

मृद्वीका गोस्तनी द्राक्षा मधुयोनी फलोत्तमा
मधुफला स्वादुफला द्राक्षा काश्मीरका मता ।
द्राक्षा फलोत्तमा वृष्या चक्षुष्या सृष्टमूत्रविट्
स्वादु पाकरसा स्निग्धं सकषाया हिमा गुरुः ।।
निहन्त्यनिलपित्तासृक् तिक्तास्यत्वमदात्ययान् ।
तृष्णाकासज्वरश्वासस्वरभेदक्षतक्षयान् ।।

2. कट्फला (കരിങ്കുമ്പിൾ)

कट्फलासोमवृक्षश्च रोहिणी सोमवल्कला
महाकुम्भा भद्रवती श्रीपर्णी कुमुदा तथा ।
दाहपित्तज्वराविषा तृष्णघ्नी मधुरा हिमा
कुंभी रक्तातिसारघ्नी योनिदोषनिबर्हिणी ।।

3. कतक (തേറ്റാം പരൽ)

कतकं छेदनीयं च काच्छं वारिप्रसादनम् ।
तोयप्रसादनफलं चक्षुष्यं फलदात्यकम् ।।

4. राजादनः (പാലപ്പഴം)

राजादनः फलाशी च क्षत्रियो वानरप्रियः

दृढशाखो गुरुस्कन्धः क्षीरशाखो मृगप्रियः।
स्वादुपाकरसः शीतसृण्मूर्च्छामदमोहजित्
वातघ्नो बृंहणो वृष्यो क्षीररक्तप्रसादनः।।

5. डाडिम (ഡാഡിമം എന്ന മാതളനാരകം)

डाडिमं रक्तकुसुमं करकं शुकवल्लभम्
मधुराम्लफलं सारं कुट्टिमं फलषाडवम्।
उद्रिक्तपित्तान् जयति त्रिदोषान् स्वादु डाडिमम्
पित्ताविरोधी नात्युष्णं अम्लवातकफापहम्।।
सर्वं हृद्यं लघुस्निग्धं ग्राहि दीपनरोचनम्।

6. शाक (തേക്കുമരം)

शाकसुगन्धसारश्च महापत्रः खरच्छदः
भूमिसहोद्वादारु सुस्थिरः खरपत्रकः।
गर्भसन्धानकृच्छीतो वातपित्तापहः स्थिरः
शाको विसर्पकुष्ठघ्नो रक्तपित्तप्रसादनः।।

इति एकादशो गणः

द्वादशो गणः

अञ्जनं फलनी मांसी पत्योत्पलसाञ्जनम् ।
बला सरोचकान् हन्ति विषमज्वरनाशिनी ।।

1. पाठा (പാടക്കിഴങ്ങ്)

पाठा कुचेलास्थपनी प्राचीना विद्धकर्णिका
दरतिक्ता पापचेली बृहत्तिक्ता वृकी मता।
विषघ्नी सर्वशूलघ्नी गुल्मघ्नी वातपित्तजित्
पाठा ज्वरप्रशमनी रक्तातिसारनाशिनी ।।

इति द्वादशो गणः

त्रयोदशो गणः

गुलूचीपञ्चकारिष्टाधानकारक्तचन्दनम् ।
पित्तश्लेष्मज्वरच्छर्द्दिदाहतृष्णाघ्नमग्निकृत् ।।

1. कुस्तुंबरी (കുസ്തുംബരീ എന്ന കൊത്തമ്പാലരി)

धान्या कुस्तुंबरी धाना धनिका धानका धनी
अल्लका हृद्यगन्धा च व्युष्णाग्रा च वितुन्नका ।
आर्द्रका कटुतिक्तोष्णा मूत्रला स च पित्तकृत्
योज्यापञ्जनभृक्ष्येषु विचित्रेषु प्रयोजिता ।।
आर्द्रा कुस्तुंवरी स्वर्या स्वादु सौगन्ध्यहृद्यता ।
सा शुष्का मधुरा पाके स्निग्धातृड्दाहनाशिनी ।।

इति त्रयोदशो गणः

चतुर्दशो गणः

आरग्वधेन्द्र यवपाटलिकाकतिक्ता
निंबामृता मधुरसस्रुव वृक्षपाठा।
भूनिंबसैर्यकपटोलकरञ्जयुग्म
सप्तछदाग्नि सुषवीफल बाणघोण्टा।।
आरग्वधादिर्जयति छर्दिः कुष्ठविषज्वरान्।
कफं कण्डुं प्रमेहं च दुष्टव्रणशोधनः।।

1. काकतिक्ता (കാക്കക്കൊടി)

शाङ्र्ष्ठा काकतिक्ता च वायस्या तुण्डुकी तथा
अंगारवल्ली कटुका ध्वांक्षवल्ली करञ्जिका।
छर्दिकुष्ठज्वरश्लेष्मकृमिपाण्डुविनाशिनी
प्रमेहघ्नी कषायोष्णा शार्ङ्गष्ठा कटुका मता।।

2. विकंकता (വയ്യങ്കത)

विकंकता स्रुवतरु ग्रन्थिला स्वादुकण्टकः
स्वानद्रुमं काकतरुः विषघ्नो व्याघ्रपादवी।
शीतस्तिक्तध्रुवतरुः श्लेष्मश्च यथुनाशनः
उद्रिक्तशोणितं हन्ति ग्रहणी दीपनं परम्।।

3. किराततिक्तक (ഉത്തരകിരിയാത്ത്)

किराततिक्तको हैमः पाण्डुतिक्ता किरातका
भूनिंबानार्यतिक्तश्च किरातो रामसेनकम्।

शीतोलघुस्तिक्तरसो भूनिंबः समुदाहृतः
श्लेष्मपित्तास्रकोपघ्नः कासतृष्णा ज्वराञ्जयेत्।।

4. **कुरण्डक (പൊൻനിറം കുറിഞ്ഞി)**

दासी कुरण्डकोऽम्लाना वर्णाढ्या कुरुवस्तथा।

5. **सैरेयक (കരിംകുറിഞ്ഞി)**

राजसैरेयकश्चान्यो नीलपुष्पश्च सैरिकः
बाणश्शोणसहचरः केशरञ्जनकस्मृतः ।
सैर्ये च तिक्तमधुरः स्निग्धोष्णा कफवातजित्
केश्याखालित्यपालित्यबाधाप्यूरुणनाशनः ।।

6. **सप्तच्छद (പാലമരം)**

सप्तछदो बृहत्वक् च सप्ताह्वो गुच्छपुष्पकः।
सप्तपर्णी सप्तपत्रो युग्मपत्रा बहुच्छदः।।

7. **स्रोतोञ्जनं (സ്രോതോഞ്ജനം എന്ന അഞ്ജനക്കല്ല്)**

(नंसे?) ला मधूक नागाह्व विषान्तर्द्दाहपित्तजित्
अञ्जनं यामनतोप्यं स्रोतोजं नेत्रभूषणं।
कपोतनन्दनं भव्यं यदृच्छांगितदं परं
रक्तपित्तादिसारघ्नं अञ्जनं नयनामृतम्।।

8. **सौवीराञ्जनं (സൗവീരാഞ്ജനമെന്ന അഞ്ജനക്കല്ലിൽ ഒരു വക)**

मलावहं कफछेदिविषघ्नं मधुरं रसे
सौवीर्यं पर्वतीयञ्च कृष्णनेत्राभिभूषणम् ।

पारावतं सशीतञ्च रक्तसंवरणं तथा
रक्तपित्तहरं शीतं लेखनं चक्षुषे हितम् ।।
विषातिसारशमनं अञ्जनं कुकुभोद्भवम् ।

9. मांसीजटा (ജടാമാഞ്ചി)

मांसीजटा भूतकेशी नलदा जामिषी मता।
पुलोमजालहिंस्रा च जननी च तपस्विनी।।

10. गन्धमांसी (മാഞ്ചി)

द्वितीया गन्धमांसी स्यात् केशीभूतशिखी तथा
पिशाचीभूतनाकेशी रोमकेशीति कथ्यते।
सुगन्धा पित्तशमनी विषान्तर्दाहनाशिनी
शीतवीर्या रसेतिक्ता पाके मांसी कटुस्तथा।।

11. नागपुष्प (നാഗകുസുമമെന്ന നാഗപ്പൂവ്)

नागपुष्पमतं नागकेशरा नागकेसरम्
चाम्पेयं नागकिञ्जल्कं कनकं हेमकाञ्चनम्।
नागकेसरमत्युष्णं लघुतिक्तकफापहम्
वस्तिरुग्विषवातासृक् कण्डुघ्नं शीर्षरोपनम्।।

इति चतुर्दशो गणः

पञ्चदशो गणः

पटोल कटुरोहिणी चन्दनं मधुस्रव गुडूची पाठान्वितम्।
निहन्ती कफपित्त कुष्ठज्वरान् विषावममरोचकं कामिलाम् ।।

1. पटोलः (പടവലം)

पटोलः कूलकः प्रोक्तः पाण्डुरः कर्कशच्छदः
राजीफलः पाण्डुफलो राजीमानमृतो भवः।
पटोलपत्रं पित्तघ्नं वल्लीश्वासकफापहा
फलत्रिदोषशमनं मूलं तस्यविरेचनम् ।।

2. कटुकरोहिणी (കടുകരോഹിണി)

कटुकामत्स्यपित्ता च कट्वी कटुकरोहिणी।
शशोकरोहिणी तिक्ता रोहिणीशकुलादिनी।।

3. कटुका (കടുകാ)

विषान्तर्दाहहृद्रोगकामिलाज्वरनाशिनी
तिक्ता रसे महावीर्या रेचनी कटुका मता।
जित्तवित्तिक्ता कटुश्शीतास्वदाहजित्
कुष्ठज्वरप्रशमनो विशेषा व्रणशोधनः ।।
तिक्ता कषायानुरस सप्ताह्वो रक्तशोधनः।

4. सुषवी (വലിയ പാവൽ)

सुषवी कारवल्ली च तोयवल्यबलापि च
बृहद्वल्ली वारिवल्ली सुकुमारी पलाशिका।

कृमिपित्तहरा तिक्ता भेदिनी कफनाशिनी
पाण्डुकुष्ठविकारघ्नी कारवल्ली ज्वरावहः।।

5. बाण (അമ്പ)

शरोबाण इक्षुकाण्डः इक्षकस्सायकक्षुरः।
स्थूलोऽन्यः इष्टदः प्रोक्तो इक्षुरश्चापिना मतः।।

6. बदरी (ബദരീചമരം എന്ന ലന്തമരം)

बदरी गोपघोण्टा च घोण्टी घोण्टा च कोलिका
स्निग्धछदाकोलफलारष्टवृद्धिकरी तथा।
फलेम्लमधुरश्लेष्म पित्तलावातनाशिनी
मुग्धश्चदा कोलफलारष्टवृद्धिकरी तथा ।।
मूले कषायतिक्ता च कफघ्नी बदरी मता।
बदरा कोलकं कोलं सौवीरा फेनिलं कुहम्।।
कर्कन्धू ह्रस्वबदरं स्वादु सीञ्जनकस्मृतः।

इति पञ्चदशो गणः

षोडशो गणः

अशनतिमिशभूर्जश्वेतवाहप्रकीर्या
खदिरकरभाङ्ग्र्गी शिंशपामेषशृंगी।
त्रिहिमनतपलाशी जोंगकश्शाकसालौ
धवकबुक कलिङ्गच्छागकर्णाश्वकर्णा ।।
असनादिर्विजयतेश्चित्रकुष्ठकफकृमीन्।
पाण्डुरोगं प्रमेहं च मेदोदोष निवर्हणः।।

1. बन्धूक (വേങ്ങ)

असनो बीजकः कामः प्रियः प्रियशालुकः
सुगन्धि नीलनिर्यासस्तिष्यो बन्धूकपुष्पकः।
केश्याश्चित्रहरा कुष्ठकफमेदो विशोषणः
रसायनः प्रमेहघ्नो जीवकस्त्वक्प्रसादनः।।

2. तिमिश (തിമിശമരം/തേരുമരം)

तिमिशस्यन्दनोनेमी सर्वसारो रथद्रुमः
चक्रसंवरणैश्चैव स्यन्दनश्चाश्मगर्भकः।
चित्रकुष्ठकफछेदी वृणघ्नः कृमिनाशनः
पाण्डुरोग प्रमेहघ्नो तिमिशो मेदुरो हिमः।।

3. भूर्ज (ഭൂർജവൃക്ഷം)

भूर्जो भुजो बहुपुटो बहुत्वक्को मृदुच्छदः
वीरपत्रो छत्रिपत्रो लेख्यपत्रोऽथ भूरुहः।

ग्रहघ्नो धूपयोगे च कफपित्तविषापहः
मंगल्यः पापशमनो भूर्जो मेदोविशोषणः ।।

4. ककुभ (മരുത്)

अर्जुनककुभो पार्त्थः नदीसर्जो धनञ्जयः
मधुगन्धी च पुष्पी च फल्गुनः चित्रयोध्यपि ।
कषायः कफहृद्व्रण्यो मेदो दोषनिबर्हणः
प्रमेह पाण्डुरोगघ्नी पित्तसंशमनोऽर्जुनः ।।

5. खदिर (ഖദിരം എന്ന കരിങ്ങാലി)

खदिरोबालपत्रश्च शल्यको दन्तधावनः
गायत्री रक्तसारश्च बहुशल्यः क्षतक्षमः ।
कषायतिक्तकुष्ठघ्नः कफमेदोविशोषणः
रक्तप्रसादनः शीतः खदिरो दन्तदार्ढ्यकृत् ।।

6. कदर (വെങ്കരിങ്ങാലി)

खदिरोऽन्या कदरको गौराट श्यामसारकः
कालस्कन्धा सारशल्यः कार्मुकः कुब्जकण्डकः ।
प्रमेहमेदो दोषघ्नः कफपित्तव्रणापहः
पाण्डुकुष्ठप्रशमनः कदरश्चित्रनाशनः ।।

7. शिंशपा (ഇരിപ്പുൾ മരം)

शिंशपा कृष्णसारश्च भस्मगर्भाऽवसादनी
तीक्ष्णधूमांगारसारा कपिलागुरुसारका ।

पीनसघ्नी कफहराश्चित्रकुष्ठ(प्र)मेहजित्
दुष्टव्रणप्रशमनी शिंशपा गर्भपातनी।।

8. मेषशृङ्गी (ഗളസൂഗായി (?) എന്ന കർക്കടശൃംഗി)

बस्तशृंगी मेषशृंगी पादवृक्षोऽजशृंगिका:
अविवृक्षो वनश्शृंगः चक्षुष्यो बहलाङ्गकः।
तिमिरघ्नः कफहरः श्लेष्मपित्तप्रणाशनः
व्रण्योविषघ्नः कासघ्नो मेषशृंगी प्रकीर्त्तिता।।

9. ताल (താള എന്ന കരിമ്പന)

तालोद्ध्वजो दीर्घतरुस्तृणराजस्तरुश्शलः
ध्वजवृक्षो दुरारुहो दीर्घदण्डो महाबलः।
तालयोनिः कफहरो बलकृत् शुक्लवर्द्धनः
मदकृत् पित्तजननः ताालोव्रण्यस्सुषापहः ।।

10. पलाश (മുക്കതദരം എന്ന പ്ലാശ്)

पलाशः किंशुकः पर्णी विज्ञेयारक्तपुष्पिका
क्षारश्रेष्ठो वातपोतो ब्रह्मवृक्षस्समिद्वरः ।
जन्तुयोनि व्रणहरः कषाय कफपित्तहा
भग्नसन्धानकृद्वृष्यः पलाशः कृमिनाशनः।।

11. अगरु (അകിൽ)

कृष्णागरुस्यादगरुः जोंगकः शीर्षकस्तथा
नरेन्द्रार्हं लोहजग्ध्वं कृमिजग्ध्वं वनद्रुमम्।

उष्णवीर्योऽनिलहरःसुगन्धो धूपयोगिकः
लेपनोद्वर्त्तने युक्तो धूपपाने तथाऽगरु।।

12. सर्जरस (സർജ്ജരസം എന്ന പയിൻ ചെഞ്ചല്യം)

सालः सर्जरसः कान्तः कल्याणं शीतलं तथा
....।
धूपयोगी कफासृघ्नस्संग्राहीव्रणरोपणः
अग्नि दग्धापहश्शीतः सालनिर्यासपूजितः।।

13. धव (ശീതിമരം)

धवो दृढतरो गौरः शकटाक्षो भरोद्वाहः
कषायमधुरस्तिक्तो धवलः पाण्डुरः सितः।
सुरासवोपयोगीच कषायमधुरो हिमः
पाण्डुमेहः प्रशमनः कफपित्तहरो धवः।।

14. क्रमुक (അടയ്ക്കാ)

क्रमुकः क्रमुकस्तिक्तं कषायं फलपुष्पकम्
क्रमुकं गुरुपुष्पञ्च कषायमधुरं परम्।
कषायमधुरं भेदी रोचनं मोहकृत् गुरु
पूगन्तु मुखवैरस्य मलदौर्गन्ध्यनाशनम्।।

15. छागकर्ण (മരുത്)

अजकर्णो बस्तकर्णः कषायी रजकद्रुमः
छागकर्णो जालिवृक्षः तलावृक्षोऽथ सर्जकः।

मद्ययोनिः कफहरः कषायो व्रणरोपणः
स्वेदावहो मलहरः कृमिघ्नोह्यजकर्णकः ।।

16. अश्वकर्ण (വെളുത്ത അത്തി)

अश्वकर्णः स्मृतः कार्श्यः कुशिको दीर्घपत्रकः
आरण्यो दीर्घवृक्षश्च सस्यसंवरणस्तथा ।
कषायतिक्तः कफहा व्रणसंरोपणः परम्
पाण्डुरोगप्रशमनः कुष्ठहावाजकर्णिका ।।

इति षोडशो गणः

सप्तदशो गणः

वरणसैर्यकयुग्मशतावरी दहनमोरटविल्वविषाणिका
द्विबृहतिद्विकरञ्जजयाद्वयं बहलपल्लवदर्भरुजाकरः ।
वरणादिः कफमेदो मन्दाग्नित्वं नियच्छति
आढ्यवाताशिरचूशूलं गुल्मं चान्तस्सविद्रधिम् ।।

1. वरण (തോരന്തുക്കി എന്ന നീർമാതളം)

वरणो बीजकः कामः प्रियः प्रियतरुः स्मृतः
वरण श्वेतपुष्पश्च तिक्तशाकद्रुमस्तथा ।
सेतुद्रुमो रोधवृक्षः तमालो मारुतापहः
वर्ध्मविद्रधि वातघ्नः पित्तास्रक्कफनाशनः ।।
बाधिर्यः कर्णशूलघ्नः वरणो योनिदोषजित् ।

2. मोरट (പെരുങ്കുരുമ്പ)

मोरटः कीर्णपुष्पश्च पीलुपत्रो मधुस्रवः
घनमूलो दीर्घमूलः परूषः क्षीरमोरटः ।
ज्वरघ्नो मुखवैरस्य तृष्णादाहविनाशनः
कफपित्तहरः स्वादुर्विज्ञेयः क्षीरमोरटः ।

3. विषाणिका (ആട്ടുകൊട്ടപ്പാല)

अजशृंगी रक्तदुग्धा महाक्ष्वेलाक्षिभेषजाः
कूर्च्चपर्णी मेषशृंगी शक्रनेमी विषाणिका ।
सतिक्ता कफपित्तघ्नी सर्वनेत्रविकारजित्
कफपित्तहरारूक्षाच्छागशृंगी विषापहा ।।

4. दर्भ (ദർഭപ്പുല്ല്)

कुशोदर्भ श्वेतदर्भो यज्ञांगो यज्ञभूषणः।
क्षुद्रोऽपरस्सूचिपत्रो लताबर्हिरिति द्विधा।।

5. आर्त्तगल (നീലക്കുറിഞ്ഞി)

आर्त्तगलो भीषणकः रुक्करो बहुकण्टकः
जालिवृक्षक दुस्पर्शः स्वादुतिक्तफलस्तथा।
कफासृक्पित्तशमनो वृणशोधनरोपणः
कषायतिक्तः सस्वादुरार्त्तगलो ज्वरापहः।।

इति सप्तदशो गणः

अष्टादशो गणः

ऊषकस्तुत्थको हिंगु कासीसद्वय ससैन्धवम् ।
सशिलाजतुकृच्छ्राश्मगुल्ममेदः कफापहः ।।

1. क्षारमृत्तिका (ഊഷരമൂത്രക്ഷാരമണ്ണ്)

....

ऊषरः सिंहमूत्रश्च तेषाञ्चित्क्षारमृत्तिका ।
मूत्रकृच्छ्राश्म गुल्मघ्नः कफमेदोविशोषणः
योनिदोषहरः स्रंसी सक्षारस्तूषरः स्मृतः ।।

2. तुत्थं (കർപ്പൂരി എന്ന തുത്ഥം)

तुत्थं कर्पारिकातुत्थममृतां संगमेव च
मयूरग्रीवकं चान्यकटिभं बहिकण्टकम् ।
तुत्थं कटु च सक्षारं लेपनं नेत्ररोगजित्
कफघ्नमुष्णवीर्यञ्च मूत्रकृच्छ्राश्मभेदनम् ।।

3. हिंगु (ഹിംഗു എന്ന സോമനാദികായം)

हिंगुरामठमत्युग्रं जन्तुघ्नं भूतनाशनम्
अगूढगन्धं रक्षोघ्नं जरणं सूपधूपनम् ।
हिंगुवात कफानाह शूलघ्नं पित्तकोपनम्
दीपनं पाचनं रुच्यं कृमिघ्नं कुष्ठरोगजित् ।।

4. पुष्पकासीस (പുഷ്പകാസീസം)

....

कासीसं द्वितीयं पुष्पकासीसं शंखकातत्पुलोमशम्।
सक्षारतिक्तं चक्षुष्यं कासीसं केशरञ्जनम्
कफवातहरा व्रण्यमश्मघ्नं मूत्रकृच्छ्रजित्।।

5. शिलाजतु (കർപ്പൂരശിലധാതു)

शिलाजतुशिलाह्वा च शिलाभिष्यन्ति पर्वतम्
शिलाजं शैलनिर्यासं गिरिजा शैलसंभवम्।
सतिक्त कटुकं छेदि कफघ्नं च रसायनम्
सर्वामयहरं सोष्णं छेदनं च शिलाजतु।।

इति अष्टादशो गणः

ऐकोनविंशो गणः

वेल्लन्तरारणिकटूकवृषाश्मभेद-
गोकण्टकेत्कटसहचरबाणकाशाः ।
वृक्षादनी नलकुशद्वय गुच्छगुन्द्रा
भल्लूकमोरटा कुरूटकरंभपार्त्थाः ।।
वर्गो वीरतराद्योऽयं हन्ति वातकृतान्गदान् ।
अश्मरीशर्करामूत्रकृच्छ्रकाघातरुजापहः ।।

1. वीरतरु (വീരതരു)

वेल्लन्तरो वीरतरुर्बहुधाकार एव च
महाशनि स एव स्यादर्णवापूषणो दृढः ।
दीर्घमूलो वीरवृक्षो दीर्घवृक्षोश्मकृच्छ्रहा
निश्शेषवातरोगघ्नी मूत्रकृच्छ्ररुजापहः ।।
योनिदोषहरस्रंसी तिक्तो वीरतरो रसे ।

2. बूक (പാഷാണഭേദി)

बूकस्थूलस्थूलवृक्षो पुष्पोकिण्वमूलकम्
पाण्डुरोगप्रियो रुद्रप्रियञ्चीश्वरमल्लिका ।
वसुशीतवीर्यं कृच्छ्रहरो बूक पाषाणभेदकः
दाहतृष्णा ज्वरहरो पित्तघ्नो योनिदोषजित् ।।
अश्यभेदश्शिलाभेदि प्रस्तरो नगभेदकः
पाषाणभेदो नगभिदश्महाऽश्मरिभेदकः ।
सतिक्त कटु वीर्यश्च मूत्रकृच्छ्रप्रमेहहा
योनिदोषहरः स्रंसी व्रण्यः पाषाणभेदकः ।।

3. **उत्कटा (മഞ്ഞക്കരിമ്പ് അല്ലെങ്കിൽ നാക്കണക്കരിമ്പ്)**

उत्कटा सूक्ष्मपत्रा च दीर्घलोमी तु यष्टिका
मधुरा ह्रस्वमूला च मूत्रकृच्छ्ररुजापहः।
शीता कषायमधुरा मूत्रकृच्छ्ररुजापहः
उत्कटाऽनिलपित्तघ्नी वृष्या विस्फोटनाशिनी।।

4. **काश (വെൺകരിമ്പ്)**

काशः काशेक्षुकः स्वादु काशेक्षुर्वायसेक्षुका
श्वेतचामरपुष्पश्च काशः काण्टेक्षुकाणिका।
रसे पाके च मधुरा शीतवीर्यसुषापहः
बृंहणो रक्तपित्तघ्नः काशो मूत्रविशोधनः।।

5. **इक्षु (നീലക്കരിമ്പ്)**

इक्षुर्मधुतृणो भूरिरसस्थूलोऽसिपत्रकः
मृत्युपुष्पो गुडतृणः तृणराजो महारसः।
मधुरश्शीतवीर्यश्च बृंहणो वातपित्तहः
.... ।।

6. **मृत्युपुष्प (ദേവതാളി)**

नालो नाला मृत्युपुष्पो सुषिरो नीरजस्तथा
हृद्यमद्य पोटगलो नलीकोऽथ विभीषणः।
वस्तिरोगहरं मूत्रकृच्छ्रघ्नं पित्तरोगजित्
योनिदोषहरश्शीतो नलो मूत्रविकारजित् ।।

7. कुश (ദർഭ)

कुशोदर्भः श्वेतदर्भो यज्ञांगो यज्ञभूषणः
क्षुद्रोऽपरस्सूचिपत्रो लताबर्हिरितिद्विधा ।
मूत्रकृच्छ्राश्मजिद्वस्ति शूलहा मधुरो रसे
रक्तपित्तहरः शीतः दाहतृट्छर्दिहृत्कुशः ।।

इति एकोनविंशो गणः

विंशो गणः

1. गुच्छ (കുശ എന്ന ഇഞ്ചിപ്പുല്ല്)

गुच्छो वृत्ततृणं शुण्ठः शृंगिवेराभ मूलकः
शुण्ठः कण्ठः तृणः कुण्ठः वर्त्तुलः पृथुकन्दकम्।
कषायस्तु रसेस्वादु शीतलो मूत्रकृच्छ्रजित्
रक्तपित्तहरो गुच्छो रजश्शुक्लविशोधनः।।

2. करूट (ചെറിയകുശ)

शितिवारः क्षेत्रभूषः कुरूटः क्षेत्रमञ्जरी
कृष्णरूक्षफला चैव चुचूक श्रीकरेणुकः।
शीता स्वादुरसा वृष्या कफासघ्नी रसायनी
कुक्कुटा मूत्रकृच्छ्रघ्नी वस्तिवातनिवारणी।।

3. वसिर (അത്തിത്തിപ്പലി)

वसिरस्सर्वदा पुष्पा स च मर्क्कटपिप्पली।
.... ।।

4. इन्दीवरा (നീലത്താമര)

इन्दीवरा युग्मपत्रा दीर्घवृत्तोत्तमारणी
पुष्पमञ्जरिका द्रोणी तथा मर्कटनालिका:।
दुद्रुघ्ना मूत्रकृच्छ्रघ्नी कषायव्रणशोधनी
गर्भघ्नी योनिशूलघ्नी कफघ्नी चोत्तरमारणी।।

5. सुवर्च्चला (സൂര്യഭക്തം)

सुवर्च्चला सूर्यभक्ता पार्त्थवादित्यवल्लभा
कपोतपंकात्वष्ट्री च सैव ब्रह्मसुवर्च्चला।
तिक्ता कषायासुरसा मूत्रकृच्छ्राश्मनाशिनी
सुवर्च्चला स्फोटहरा योनिशूलविनाशिनी।।

इति विंशो गणः

एकविंशो गणः

लोद्ध्रशाबरकलोद्ध्रपलाशा
झिंझिणी सरलकट्फलयुक्ताः ।
कुत्सिताङ्ग कदलीगतशोकाः
सैलवालुक परिपेलवं मोचाः ।।
एष लोद्ध्रादिको नाम भेदः कफहरोगणः।
योनिदोषहरस्तंभी पर्ण्यो विषविनाशनः।।
जिंगिणी झिंझिणी ज्ञेया मोदकी गुलमञ्जरी
.... ।
वातघ्नी मधुरा सोष्णा बृंहणी योनिशोधनी
झिंझिणी कटुका पाके तथातिसारनाशिनी।।

1. पूतिकाष्ठ (പൂതിഗന്ധി അല്ലെങ്കിൽ സരളമരം)

सरलः पूतिकाष्ठञ्च विडा पीतद्रुरुच्छ्रितः
द्वीपवृक्ष स्निग्धदारुः ज्ञेयो मारीचपत्रकः।
सुस्निग्धकटुकं पाके कर्णशूलनिवारणः
पूतिगन्धश्चोष्णवीर्यः सरलः कफनाशनः।।

2. कदम्बा (കടുമ്പ്/കടമ്പ്)

कदंबो वृत्तपुष्पश्च कुत्सितांगो बलिप्रियः
कादंबर्यः षड्पदेयः तथा हलधरप्रिया।
कषाय कफमेदोघ्नः कदंबो योनिदोषजित्
व्रण्यो व्रणघ्नः संग्राही विषघ्नो जन्तुनाशनः।।

3. कदली (വാഴ)

कदलीदीर्घपत्रा च मोचा हस्तिविषाणिका
असारा रक्तरासा च रंभा सा ग्रन्थिनी मता।
स्निग्धा स्वादुरसा गुर्वी क्षुत्तृष्णारक्तपित्तजित्
शीतवीर्याश्मरिहरा कदली योनिदोषजित्।।

4. अशोक (അശോകം)

अशोको वीतशोकश्च सुभगस्ताम्रपल्लवः
पिण्डीपुष्पो हेमपुष्पो शोकघ्नः कर्णपूरकः।
तृड्दाहशोकमोहोघ्नः शीतवीर्योऽतिसारजित्
व्रण्यो विषघ्नः शोकघ्नः अशोकस्तिक्तको रसे।।

5. एलवालु (ചിറ്റേലം)

एलवालुकमैलेयं सुगन्धि हरिवालुकं
कुष्ठगन्धी सुगन्धी च गन्धत्वक्तञ्चवालुकम्।
सर्वरोचकहृद्रोगकृमिकासस्तृषापहः
पित्तशोधनविण्मूत्रदोषघ्नं चैलवालुकम्।।

6. कुन्दुरुकी (കുന്തിരക്കം/ഈന്തൽ)

सल्लकी सुरभी मोचा महेरण्याश्वमूर्त्तिका
गजभक्षं कुन्दुरुकी सुगन्धा ह्लादनी रसा।
व्रण्याकषायकफहृत् पक्वातिसारनाशिनी
सल्लकी धूपयोगेषु तैलयोगेषु पूजिता।।

इति एकविंशो गणः

द्वाविंशो गणः

अर्कालर्कौ नागदन्ती विशल्या भाङ्‌र्गी रास्ना वृश्चिकाली प्रकीर्या।
प्रत्यक्पुष्पी पीततैलोदकीर्या श्वेतायुग्मं तापसानां च वृक्षः।।
अयमर्कादिको वर्गः कफमेदो विषापहः।
कृमिकुष्ठप्रशमनो विशेषाद् व्रणशोधनः।।

1. अर्क (എരിക്ക്)

सूर्याह्वोऽर्कस्सदापुष्पी क्षतक्षीरी च रूपिका
शुकच्छदा दुग्धिकिनी सविता च प्रतापवान्।
कफवातहरा तिक्ता कृमिकुष्ठविषापहा
दुष्टव्रणहरा तीक्ष्णा सारमेया विषापहा।।

2. अलर्क (വെള്ള എരിക്ക്)

अलर्कः श्वेतपुष्पश्च मन्दारो गणरूपका
राजार्क सूर्यवृक्षश्च विकीर्णफलकस्तथा।
तीक्ष्णो विषघ्नो भूतघ्नो मन्दारः कफवातहा
रूपिकाया गुणिणस्तुल्य प्लीहघ्नो रक्तगुल्मनुत्।।

3. नागदन्ती (നാഗദന്തി)

नागदन्ती श्वेतदन्ता मधुपुष्पा विशोधनी
पर्वपुष्पी शुक्लपुष्पी श्वेतगन्धाऽथनागिनी।
तिक्ता कृमिविषच्छर्द्दिकफास्रघ्नी विशोधनी
कोष्ठशूलाहरा चोष्णा नागिनी सर्वदोषजित्।।

4. लांगलिका (ലാംഗലി/മേന്തോന്നി)

विशल्या हलिनी सीरी प्रदीप्ता गर्भपातिनी
इन्द्रपुष्पी लांगलिका वह्निज्वालाग्निजिह्विका।
कटूष्णा वस्तिशूलघ्नी गर्भघ्नी श्लेष्मनाशिनी
जरायुपातनी तिक्ता लांगली कुष्ठरोगजित्।।

5. भाङ्र्गी (ചെറുതേക്ക്)

भाङ्र्गी गर्द्दबशाका च पालिन्यंगारवल्लिका
महावर्बरिका भाञ्जी भाङ्र्गी ब्राह्मणयष्टिका।
कषायतिक्ता कटुका दीपनी पाचनी लघु
कासश्वासहराहिक्का कफघ्नी भाङ्र्गिका मता।।

6. ज्योतिष्मती (കംഗു എന്ന ചെറുപുന്നരി)

ज्योतिष्मती तत् कणिका पारावतपदी प्रिया
पीततैला सलवणा वेगा काकादनी तथा।
वामनी कफवातघ्नी तीक्ष्णा सा मोहिनी तथा
मेध्या कषायकटुका तिक्तं ज्योतिष्मती रसे।।

7. क्षुद्रश्वेता (കിലുകിലുക്കി)

क्षुद्रश्वेता सनाभा च कैडर्या बहुकण्टकः
कटभी मधुरेणुश्च श्वेतपाटलिपौण्ड्रकः।
कफमेदोहरस्तिक्तो दुष्टव्रणविशोधनः
विषकुष्ठः प्रशमनः कैडर्यः कृमिनाशनः।।

8. महाश्वेता (കിലുകിലുക്കി വേറെ ഒരുവിധം)

महाश्वेता च कटभी किणिहीर्गिरिकर्णिका
शिरीषपत्रा पालिन्दी विषघ्नी शतपाद्यपि।
शिरोरोगहरा तीक्ष्णा कषाया कटुका रसे
व्रणघ्नी सर्वविषजिद्गिरिकर्णी त्रिदोषजित्।।
कोरंका वृद्धकर्णश्च तिलकः पूतिकर्णकः।
ग्रहघ्नः कृमिकुष्ठघ्नो दुष्टव्रणविशोधनः।।
तिक्ता कटुरसः पाके वीर्योष्णः कफहिंगुदः।

इति द्वाविंशो गणः

त्रयोविंशो गणः

सुरसयुगफणिर्जं कालमालो विलङ्गः
खरबुसविषकर्णीकट्फलं कासमर्दः।
क्षवकझरसिभाङ्र्गीकामुकाः काकमाची
कुलहलविषमुष्टी भूस्तृणो भूतकेशी।।
सुरसादिर्गणश्लेष्ममेदः कृमिनिपूदनः।
प्रतिश्यायारुचिश्वासकासघ्नो व्रणशोधनः।।

1. कृष्णसुरसा (കൃഷ്ണതുളസി/ചുവന്ന തൃത്താവ്)

सुरसा तुलसीकृष्णा चक्रपर्णी सुमञ्जरी।
भूतप्रिया नागमाता तुलसी सुरसाग्रणी।।

2. श्वेतसुरसा (വെളുത്തതൃത്താവ്)

द्वितीया सुरसागौरी श्वेता सुरभिमञ्जरी
श्रीमञ्जरी भूतकेशी तुलसी सुरसाग्रणी।
सुगन्धातिक्तकटुककृमिकुष्ठप्रणाशिनी
कासहिक्काश्वासहरा तुलसी विषनाशिनी।।

3. फणिर्जक (കാട്ടുതൃത്താവ്)

फणिर्जको मरुवकः खरपत्रो मरुत्तमः
जंबीरको मरुवकः तीक्ष्णगन्धा सुगन्धकः।
कृमिघ्नः कुष्ठरोगघ्नो वृश्चिकानां विषापहः
फणिर्जकस्तिक्तरसः पाकेसोष्णा कफापहः।।

4. कालमाल (തുണ്ഡികാഗ്രാളി)

कालमालकरालश्च मालिकः कृष्णमालिकः।
कृष्णार्जकस्तीक्ष्णगन्धा कुठेरः कृष्णमल्लिका।।

5. फणिर्जक (കാട്ടുതുളസി എന്ന കാട്ടുതൃത്താവ്)

कुठेरिकोऽन्यो वैकुण्ठो वर्ण सौगन्धपत्रकः
अर्जकस्तीक्ष्णगन्धश्च क्षुद्रपत्रो बहुच्छदः।
कण्ठसंसक्त केशघ्नः सतिक्त कटुकोरसे
अर्जको द्विविधः कण्डूकुष्ठः कृमिविनाशनः।।

6. खरबुस (മരുവകം)

सुखात्मकः खरबुसः मरुवः खरपत्रक
सूक्ष्मबीजस्सुगन्धा च दीपनः कृमिनाशनः।
सुगन्धः कफपित्तघ्नः कृमिकुष्ठ विषापहः
उष्णसतिक्तवीर्यश्च मरुवछर्द्दिनाशनः।।

7. आखुकर्णी (എലിച്ചെവിയൻ)

वृषकर्ण्याखुकर्णी च तथा भूरितरस्त्रवा
मूषिकश्रवणी लीका तथावोन्दुरुकर्णिका।
कृमिघ्नो मूत्रकृच्छ्रघ्नो तिक्ता पाके कटुर्ल्लघु
कषायमधुरा शीता श्लेष्मघ्नी चाखुकर्णिका।।

इति त्रयोविंशो गणः

चतुर्विंशो गणः

कासमर्दोऽरिमर्दश्च कासारिः कर्कशस्तथा
कालङ्कक इत्युक्तः स च स्यात्कासमर्दकः।
कासमर्दः समाख्यातः सूक्ष्मश्शिशिर एव च
कासनिर्न्यास यत्येषां नाशयत्यखिलं विषम्।।

1. **क्षवक** (പൊന്നാരിവീരൻ/പൊന്നാവീരം)

क्षवकः क्षुरकस्तीक्ष्णः कृशवृद्धेर्जनस्य सा
क्षुद्रापि जननोराजः क्षवकः क्षुद्विबोधकः।
स्रावयत्यक्षिनासास्यं जिंहिका मुद्विचेत्कटुः
कृमिघ्नः कुष्ठकफहा तीक्ष्णस्याद्राजसर्षपः।।
कपित्थपत्रा झरसीनिर्भरः छत्रिपत्रिका
विरूपा कुलजा .... पुष्पपत्रिका।
तीक्ष्णोष्णं कटुकं पाके रसे तिक्ता कषायका
कृमिश्लेष्महरामेदः प्रमेहघ्नी त्रिपत्रिका।।

2. **कामुक** (നീരശ്ശിനി)

प्राचीबलो नदीकान्तो जलजो रक्तमञ्जरी
नीरजा तोयजश्चैव नदी कामुक एव च।
तिक्ता कषायानुरसा शोफा कृमिविनाशनः
प्राचीबला कफहरो मेदो दोषनिबर्हणः।।

3. काकमाची (കാകമാചി/മണത്തക്കാളി)

काकमाची बहुफला कुमारी जघनेफला
ध्वाङ्क्षमाची गुडफला कुष्ठघ्नी वायसी तथा।
हन्तित्रिदोषकुष्ठञ्चवृष्यासोष्णा रसायिनी
काकमाची सरास्वर्या पथ्या पर्युषिताविषा।।

4. कुलहल (വെളുത്തരം)

कुलहलोऽलंबुषश्च गोश्छालशशकस्तथा
नीचैकदंबको बोलः स्थविरो भूकदंबकः।
तिक्ता कषायानुरसा कृमिमेदः कफापहः
कुलहलो मूत्रकृच्छ्र योनिदोषहरस्सरः।।

5. विषमुष्टि (വിഷമുഷ്ടി എന്ന കാഞ്ഞിരം)

विषमुष्टिः केशमुष्टिः क्षुद्रमुष्टिः समुष्टिकः
विषनामयुतो मुष्टिः क्षुद्राह्वः काकमुष्टिका।
मदाखुविषहा तिक्ता कषायानुरसो रसे
कफघ्नी कृमिहा मेदः पित्तघ्नो विषमुष्टिका।।

6. भूस्तृण (പൂതണക്കപ്പല്ല്)

भूस्तृणो गुह्यबीजः सुगन्धः पुंस्त्वनाशनः
मलातृणश्शृङ्गिबीजो बधिरा शब्दरोधनः।
उदर्दशमनः श्लेष्मकृमिघ्नः कुष्ठनाशनः
सुगन्धो वातशमनो भूस्तृणोऽरोचकापहा।।

7. निर्गुण्डी (കരിനൊച്ചി)

निर्गुण्डी वनजेन्द्राणी सिन्दुवारस्तथाऽपि च
नीलमञ्जर्यमरी च भूतकेशी सुपुष्पिका ।
वातघ्नी कुष्ठशमनी कृमिमेदोहराऽपि च
मध्या क्षयहरा लघ्वी निर्गुण्डी वह्निदीपनः ।।

8. मोक्षक (മുഷ്കകവൃക്ഷം)

मुष्ककस्नुग्वराद्वीपिपलाशधव शिंशपाः ।
गुन्ममेहाश्मरी पाण्डु मेदोर्शः कफशुक्लजित् ।।
मुष्ककस्तीक्ष्णकः क्षारः क्षारवृक्षो विषापहः
मोक्षकश्शिखरीमुष्टिर्मुष्कको मृजकस्तथा ।
सतिक्त कटुकस्तीक्ष्णः कृमिश्लेष्मविषापहः
मेदोहरश्शुक्लहरो मुष्ककः क्षारसाधनः ।।

शेषं प्रागुक्तमिति पञ्चविंशो गणः

पञ्चविंशो गणः

वत्सक मूर्वा भाङ्र्गी कटुकामरीचंघुणप्रिया गण्डीरम्
एलापाठाजाजी कट्वंगफलाजमोद सिद्धार्थवचाः।
जीरक हिंगुविलंगं पशुगन्धा पञ्चकोलकं हन्ति
चलकफमेदः पीनसगुन्मज्वरशूलदुर्न्नाम्नः।।

1. अतिविषा (അതിവിടയം)

शुक्लमन्दाचातिविषाभंगुरा गुणवल्लभा
प्रतिविषाश्यामकन्दा विषामाद्रिक च शृंगिका।
दीपनी पाचनी शीता कफपित्तविशोधनी
आमातिसारशमनी कृमिघ्नाऽतिविषा लघु।।

2. जीरक (ജീരകം)

जीरकं दीप्यकं हृद्यमजाजी दीप्यमागधम्
मनोज्ञं जरणं रुच्यं पीताहं युज्यमानकम्।
दीपनं पाचनं हृद्यं सुगन्ध्युद्गारशोधनम्
अरोचकातिसारघ्नं श्लेष्मघ्नं जीरकं कटु।।
रक्तपित्तहरं तिक्तं गर्भाशयविशोधनम्।
कफपित्तहरञ्चैव शूलघ्नं कृष्णजीरकम्।।

3. अजमोद (അയമോദകം)

अजमोदो बस्तमोदो दीप्यकोऽथ यवानकः
उग्रगन्धो हृद्यगन्धो मोदो हस्तिमयूरकः।

रसे पाके च कटुको वीर्योष्णस्त्वजमोदकः
दीपनः पाचनश्शूलः कृमिघ्नः कफपित्तहः ।।

4. चव्या (കാട്ടുമുളക്)

चव्या कोलोऽथ चविकं श्रेयसी गजपिप्पली
चव्यना कोलवल्ली च चव्यं कुञ्जरपिप्पली ।
दीपनं पाचनं रुच्यं शूलघ्नं कृमिनाशनम्
फलं रक्तातिसारघ्नं बालानां कण्टुरोगजित् ।।

इति पञ्चविंशो गणः

षड्विंशो गणः

वचाजलददेवाह्वनागातिविषाभया
हरिद्राद्वययष्ट्याह्वकलशीकुटचोद्भवाः ।
वचाहरिद्रादिगणा वामातिसारनाशनौ
मेदः कफाढ्या पावनस्तन्यदोषनिबर्हणः ।।

1. भद्रमुस्ता **(ഭദ്രമുസ്ത എന്ന മുത്തങ്ങ)**

मस्तमंबुधरो मेघो घनोरजकशेरुकः
भद्रमुस्ताऽपरा गौरा गाङ्गयः कुरुविन्दकः ।
मुस्तातिक्तकषायस्यात् शिराश्लेष्मामपित्तजित्
पित्तज्वरातिसारघ्नी तृष्णादाहविनाशिनी ।।

पूर्वोक्ता सर्वे षड्विंशो गणः

सप्तविंशो गणः

प्रीयंगु पुष्पाञ्जनयुग्मपद्मा पद्मार्द्रजोयोजनवल्यनन्ता ।
मालद्रुमो मोचरसस्समंगा पुन्नामशीतं मदनीयहेतुः ।।

1. स्थलपद्मिनी (സ്ഥലപദ്മിനി/ഓരിലത്താമര)

पद्मं पुष्करपर्णीच चारटी भारवाहिनी
रथावर्त्ता सशीता च चारणी पद्मचारिणी ।
वातघ्नी शूलशमनी कृच्छ्रघ्नी मूत्रशोधनी
पाषाणभेदिनी तिक्ता विज्ञेया स्थलपद्मिनी ।।

2. मञ्जिष्ठा (മഞ്ജിഷ്ഠാ)

मञ्जिष्ठा विकसा रक्ता ताम्रयोजनवल्यपि
ताम्रमूला कालमेषी भाण्ढीरा रक्तपुष्पिका ।
तिक्ता कषाया कुष्ठघ्नी विसर्पज्वरनाशिनी
रक्तातिसारशमनी मञ्जिष्ठा योनिदोषजित् ।।

3. शाल्मली (ഇലവ്)

मानद्रु शाल्मली मोचा पूरणा रक्तपुष्पिका
याम्यद्रुम स्थूलफला कुक्कुटा स्थिरजीविका ।
वृष्यारसायिनी शीता मधुरा रसपाकतः
रक्तपित्तहरा चैव शाल्मली धातुबृंहणी ।।

4. शाल्मलीवेष्टक (ഇലവിൻപശ)

निर्यासो यस्तु शाल्मल्याः स मोचरससंज्ञितः
शाल्मवेष्टकाविद्या मोचनिर्यास एव च ।

पक्वातिसारशमनो हन्ति घोरप्रवाहिकाम्
पिच्छिलाः शुक्ललः शीतः सन्धानश्शाल्मलीरसः ।।

5. समङ्गा (മുക്കുറ്റി)

समङ्गा तु शमीपत्रा लोहिताऽञ्जलिकारिका
नमस्कारी रक्तमूलारुहा स्पृक्काऽस्त्ररोधिका ।
अतिसारहरा रक्तशमनी योनिदोषजित्
कफपित्तहरा शीता समङ्गा तिक्तको रसे ।।

6. पुन्नाग (ചെറുപുന്ന)

पुन्नागः पुरुषस्तुंगः पुन्नामा पाटलीच्छदः
पाटली दीर्घमूला च सुदन्धी खट्वनः प्रियः ।
पुन्नागः शिशिरः पित्तहारी चक्षुः शिरोरुजं
निहन्ति पक्वातिसारमरोचकविषव्रणान् ।।

7. धातकी (ധാതകി എന്ന കുസുമം)

धातकी ताम्रपुष्पी च कुञ्चिका मद्यवासिनी
मदहेतुः शीथुपुष्पी दिनी कामादिनीसहा ।
रक्तातिसारशमनी रक्तार्शस्रावनाशिनी
पित्तघ्नी शीतवीर्या च कषाया धातकी रसे ।।

इति सप्तविंशो गणः

अष्टाविंशो गणः

अंबष्ठा मधुकनमस्कारी नन्दीवृक्षपलाशकच्छुरा
लोद्ध्रधातकी विल्ववेशिका कट्वंगः कमलोद्भवं रजः।
गणौ प्रियङ्ग्वंबष्ठादिपक्वातिसारनाशनौ
सन्धानी यौ हितौ पित्ते व्रणानामपि रोपणौ।।

1. अम्बष्ठा (അമ്പഷ്ഠ)

अंबष्ठा बहुमूला च सहस्रा भूरिमूलिका
मधुकपर्णोषि कार्षिका मसूरविदलेति सा।
पक्वातिसारशमनी कषायाम्लारसे लघुः
कफपित्तहरा शीता सुगन्धांबष्ठकी मता।।

2. नन्दीवृक्ष (നന്ദിവൃക്ഷം)

नन्दीवृक्ष प्ररोही च जयवृक्षो वनस्पतिः
पृथुक्षीरी जयतरुः स्थूलवृक्षोऽथ कुञ्जरः।
पक्वातिसारशमनो विषघ्नः कफपित्तहा
रसेपाके च कटुको वीर्योष्णो नन्दिवृक्षकः।।

3. कच्छुरा (കച്ചോരം)

कच्छुरा फणिहारीच सूक्ष्मपर्णी मरुद्भवः
विशारदाः विरूपी च मरुजाता कषायणी।
रक्तप्रकोपशमनी कोष्ठरक्तविशोधनी
कषायतिक्ता पित्तघ्नी कच्छुरा योनिदोषजित्।।

इत्यष्टाविंशो गणः

एकोनत्रिंशो गणः

मुस्तावचाऽग्नीद्विनिशाद्वितिक्ताभल्लातपाठात्रिफलाविषाख्याः।
कुष्ठं तुटी हैमवती च योनिस्तन्यामयघ्नामलपाचनाश्च।।

1. भल्लातक (ചേരുംകാ)

भल्लातको वीरतरुस्तपनो दहनाग्निकः
रुजाकरः स्फोटकरः क्षतकृत् स्फोटहेतुकः।
भल्लातकस्य त्वङ् मांसबृंहणं स्वादुशीतलम्
तदस्थ्यमग्निकरं मेध्यं कफवातहरं लघु।।
कफजो न स रोगोस्ति न विबन्धोस्ति काचन।
यं न भल्लातकं हन्यच्छीघ्रमग्निबलप्रदम्।।

इत्येकोनत्रिंशो गणः

त्रिंशो गणः

न्यग्रोधपिप्पलसदाफलवोद्ध्रयुग्मजंबूद्वयार्जुन कपीतनसोमवल्काः।
प्लक्षाम्लवञ्चुलप्रियाल पलाशनन्दी कोलीकदंबविरला मधुकं मधूकम् ।।
न्यग्रोधादिर्गणो व्रण्यः संग्राही भग्नसाधनः ।
मेदः पित्तास्रतृड्दाह योनिदोषनिवर्हणः।।

1. पनस (പ്ലാവ്)

पनसः स्वर्णसारश्च रोरटो गज आहुलः।
महाफलो हविर्गन्धी मधुरो मोच उच्यते।।

2. केरवृक्ष (തെങ്ങ്)

नालिकेरो महावृक्षो नीलरन्ध्रस्त्रिलोचनः ।
लतावृक्षो दाक्षिणात्यः शुचुकः कूर्प्पकेसरः।।

3. न्यग्रोध (പേരാൽ)

न्यग्रोधः स्कन्धजः शृंगी क्षीररक्तफलो वटः
सेतर्द्रुमो वैस्रवणोः बहुपादो वनस्पतिः।
कफपित्तहरोव्रण्यः संग्राही सकषायकः
शीतवीर्यो वटश्शस्तो योनिदोषेषु योषिताम्।।

4. अश्वत्थ (അശ്വത്ഥം എന്ന അരയാൽ)

अश्वत्थ पिप्पलो बोधि शैत्यवृक्षोऽथलक्ष्मिवान्
चलपत्रः क्षीरिवृक्षः पादवृक्षो गजाशनः।
कषायकफपित्तघ्नो व्रण्यो योनि विशोधनः
अश्वत्थः शीतलो रूक्षो दुर्जरो मधुरः फले।।

5. उदुम्बर (അത്തി)

उदुंबरः कृमिफलः सुप्रतिष्ठः सदाफलः
हेमदुग्धः काञ्चिनिको यज्ञांगः क्षीरपादपः।
अग्निसन्धानकृच्छ्रीतो व्रणशोधनरोपणः
फले स्वादुरसौ मूले कषायो रूक्ष एव च।।

6. जम्बू (ഞാവൽ)

जंबू सुरभिपत्रा च सुफला सुप्रतिष्ठिता।
वृहत्फला राजजंबूर्महास्कन्धा महारसा।।

7. काकजम्बू (ചെറിയ ഞാവൽ/നിലഞാവൽ)

काकजंबू क्षुद्रफला नादेयी गन्धवल्लभा
कृमिप्रिया मेघवर्णा ज्ञेया ह्रस्वफला मता।
रूक्षा कषाया रक्तघ्नी रक्तसंग्रहणी तथा
पक्वातिसारशमनी जांबवं कफपित्तजित्।।

8. कपीतन (വെളുത്ത പേരാൽ)

कपीतनः कपेर्वासः फलीशसुप्रतिष्ठिता
वानीरः कपिचूडश्च कृमिलः क्षीरपादपः।
फलेऽम्लमधुरो मूले कषायः स्वादुमञ्जकः
स्निग्धः सुदुर्ज्जरः श्लेष्मकृमिशुक्लविवर्धनः।।

9. प्लक्ष (കല്ലാൽ)

प्लक्षस्तु पिप्पलः पुण्ड्रो गर्द्दभाण्डकमण्डलुः
मौनिकोऽश्वत्थपत्रश्च सुपार्श्वश्चारुदर्शनः।

कषाय कफपित्तघ्नो व्रणशोधनरोपणः
रक्तपित्तहरो योनिशोधना पिप्पली स्मृता ।।

10. आम्र (മാവ്)

आम्रः चूतो रसालश्च कान्तो मधुकरः प्रियः
सहकारो मन्मथश्च मनोज्ञं शौण्डिकः प्रियः ।
कषायो व्रणघ्नश्च रूक्षो योनिविशोधनः
प्रमेहाकासपित्तघ्नश्चाम्रः स्वादुफलस्मृतः ।।

11. द्राक्षा (മുന്തിരി)

प्रियालोऽम्लफलत्वक्च चारो द्राक्षा फलकस्तथा ।
मधुराम्लफलश्चैव खरस्कन्धो मुनिप्रियः ।।
फलेयाम्लमधुरो दुर्जरस्या प्रियालकम् ।

12. तिन्दुकी (തുംബര)

तिन्दुकी कालसारा च विदला दीर्घनख्यपि
विस्फूर्जनी विस्फुरणी नीलस्कन्धाऽतिमुक्तका ।
कषायमधुरा रूक्षा कफपित्तहरा फले
मूले कषाया व्रण्या च वह्निदुग्धापहारिका ।।

इति त्रिंशो गणः

एकत्रिंशो गणः

एलायुग्मतुरुष्ककुष्ठफलिनी मांसीजलध्यामक
स्पृक्का चोरकचोचपत्रतगरस्थौणेयजातीरसा ।
शुक्तिव्याघ्रनखौ सुराह्वमगरुः श्रीवासकः कुङ्कुमम्
चण्डागुल्गुलु देवधूपखपुराः पुन्नाम नागाह्वयम् ।।
एलादिको वातकफौ विषञ्च विनियच्छति ।
वर्णः प्रसादनः कण्टूपिटकाकोठनाशनः ।।

1. तुरुष्क (കണ്ടിവെണ്ണ)

तुरुष्कः कृत्रिमो धूम्रो यवानः कपिलः कपिः
पिण्याकश्चसुगन्धिश्च कृतपिण्डीतकः स्मृतः ।
स्निग्धः सुगन्धोऽनिलहा कायवैभत्स्यनाशनः
पिटकाकोठशमनः तुरुष्कः कफपित्तजित् ।।

2. जल (ഇരിവേലി)

वालकं क्षार्यं नीचं च वरिष्ठं पिङ्गलं जलम्
ह्रीबेरमंबु केशाह्वं सन्नमावसनं कचम् ।
दीपनं पाचनं हृद्यं सुगन्धी ज्वरदाहजित्
तृष्णाघ्नं छर्द्दिशमनं वालकं कफपित्तजित् ।।

3. ध्यामक (നാന്മുകപ്പുല്ല്)

ध्यामकं भावदग्ध्वं स्यात्कमालान्तं वृषगन्धिकम्
ज्वलनाभं विन्दुमितं च्यवनं दग्धकर्णकम् ।

सुगन्धी कफपित्तघ्नी कृमिकोठविनाशनम्
ज्वरघ्नं मधुरं पाके कषायं रौहिषी रसे ।।

4. स्पृक्का (ചോനകപ്പുല്ല്)

स्पृक्का देवी लताह्वा च मारुता पिशना लघुः
सुकुमारी सुगन्धा च लता कुटिलपुष्पिका ।
सुगन्धा कफपित्तघ्नी कृच्छ्रकृमिविनाशिनी
उद्धर्त्तनानि चोष्णा सा स्पृक्का त्वग्दोषनाशिनी ।।

5. चोरक (കച്ചോലം)

चोरकक्षामकच्चण्डो दौष्कुलेयो निशाचरः
तीक्ष्णमाशु करो धूर्त्तो दुष्पुत्रस्तस्कराह्वयः ।
सुगन्धी शीतलो हृद्यो कफमेदो विशोषणः
त्वग्दोषशमनं तीक्ष्णं चोरकः कटुकोरसे ।।

6. लवङ्गं (ഇലവർങ്ങം)

त्वक् चोचं च वरागं च लवङ्गं वत्कलं त्वचम्
भृङ्गं रामप्रियं हृद्यं तनुकं स्वर्णभूमिकम् ।
सुगन्धि पित्तलं शीतं हृद्रोगारुचिनाशनम्
लवङ्गं कृमिकुष्ठघ्नं प्रतिश्यायहरं तथा ।।

7. तमालपत्र (പത്രം എന്ന സമുദ്രപ്പച്ച)

पत्रं तमालपत्रं च पलाशं छदनं छदम्
सुकुमारं सुगन्धं च लोमशं वस्त्रमर्कशम् ।

सुगन्धि हृद्यं तीक्ष्णोष्णं कृम्यरोचकनाशनम्
तमालपत्रं कफहृत् प्रतिश्यायहरं तथा ।।

8. स्थौणेय (സ്ഥൗണേയം എന്ന തുണീയാങ്കം)

स्थौणोयकं तैलपीतं तैलाभं धूमसाह्वयम्
विसृष्टपत्रं सौमित्रं शुकबर्हं शुकछदम् ।
गन्धाढ्यं कफपित्तघ्नं त्वग्विकारहरं परम्
स्थौणेयं कृमिकण्डूघ्नं तिलकालकनाशनम् ।।

9. जातीरस (പഞ്ചമം പഴുക്കാ)

जातीरसो रसो बोलः कालकूटश्च बर्बरः
हालाहलो वत्सनाभः स्तोककश्चाप्तगन्धकः ।
कुष्ठरक्तहरश्शीतो गर्भाशयविशोधनः
कफपित्तहरो बोलः सुगन्धी तृड्विनाशनः ।।

10. शुक्ति (നാഗുണം)

नखो नागहनुः शुक्तिर्बदरीपत्रकः शफः ।
व्यालायुधोऽथ करजः शंखश्च नखरः खुरः ।।

11. व्याघ्रनख (പുലിച്ചുവടി)

करोरुहो व्याघ्रनखो व्यालग्रहणकस्तथा
व्याघ्रांङ्घ्रिकोऽथशार्दूल कूटस्थं चक्रवालकम् ।
सुगन्धि कफपित्तध्नं धूपालेपनकर्मणाः
नखद्वयं हृद्यतमं वर्णकृन्मदनाशनम् ।।

12. श्रीवेष्टक (സരള)

श्रीवेष्टको पायसिकं श्रीसाह्वो रक्तशीर्षकः
निर्यासस्सरलानां च दधिकश्च खरद्रुमः।
सुगन्धीतिक्तलश्शीतो धूपतैलादिवासनः
श्रीवेष्टकः कफहरो प्रतिश्यायापहा सरः।।

13. कुङ्कुम (കുങ്കുമം)

कुङ्कुमं बाल्हिकं रक्तं पिशुनं वरपीतकम्
काश्मीररक्तवर्णाभं सारमग्निशिखा तथा।
स्निग्धोष्णं वातशमनं वर्णकृद्देहगन्धकृत्
कुङ्कुमं रसतः तिक्तं कषायं कृमिनाशनम्।।

14. चण्ड (ചണ്ഡക്കിഴങ്ങ്/ചണ്ണക്കിഴങ്ങ്)

चण्डा धनहरी चौरी क्षेमिका तस्करी तथा
निशाचरी शङ्खिनिका ग्रन्थिका शङ्खिनी तथा।
सुगन्धा देहदौर्गन्ध्यमलत्वग्दोषनाशिनी
चण्डा त्वच्या कफघ्नी च धूपनालेपनादिकैः।।

15. गुग्गुलु (ഗുൽഗുലു)

ग्गुलुर्महिषाक्षश्च कौशिको यामिनीति च
नक्तञ्चरो वायसारीरुलूको रात्रिगः पुरः।
गुल्गुलुः पिच्छिलास्पर्शो विशदोऽभ्यवहारतः

सस्वादु कटुकस्तिक्तो सकषायो रसायनः।।
व्रण्यः स्वर्यः कटुः पाके रूक्षसूक्ष्मोऽग्निदीपनः ।

16. कुन्दुरु (കുന്തുരുക്കം)

कुन्दुरुर्मेचकः कुन्दुश्शिखरी गोपुरः पुरः
कर्पूरस्तीक्ष्णगन्धश्च बली नागवधूप्रियः ।
सुगन्धो धूपयोगेन तैललेपनकर्मणि
कुन्दुरुः शस्यते तीक्ष्णः कफघ्नस्त्वक्प्रसादनः।।

इत्येकत्रिंशो गणः

द्वात्रिंशो गणः

श्यामादन्ती द्रवन्तीक्रमुककुटरणाशंखिनीचर्मसाह्वा
स्वर्णक्षीरी गवाक्षीशिखरिरजनिका छिन्नरोहाः करञ्जौ।
बस्तान्त्री व्याधिघाते बहलबहुरसस्तीक्ष्णवृक्षात् फलानि
श्यामाद्यो हन्ति गुल्मं विषमरुचिकफौ हृद्रुजं मूत्रकृच्छ्रम्।।

1. चर्मसाह्वा (ചർമലന്ത)

स्यात् सातला चर्मकसा सप्तला वर्त्तकी तथा
अमला विमला दीप्ता बहुफेना रसालिका।
ऊर्ध्वाधः शोधनी तीक्ष्णा गुल्मोदावर्त्तनाशिनी
विषहृद्रोगशमनी सातला कृच्छ्रविनाशिनी।।

2. बस्तान्त्री (ഭൂദിംഗുളു (?))

बस्तान्त्री तीव्रगन्धाख्या मेषान्त्री वृत्रपत्रिकः
अजान्त्री च्छगलान्त्री च मेषामानेयकः स्मृतः।
स्रंसिनी गुन्महृद्रोगविषारोचकनाशिनी
बस्तान्त्री कफरोगघ्नी मूत्रकृच्छ्रविनाशिनी ।।

3. तीक्ष्णतरु (ജംവാളം എന്ന നീർവ്വാളം/ഉകമരം)

पीलुतीक्ष्णतरुस्रंसी शंखीकरभ वल्लभः
गुडफलः शीतसहो विरेचनफलः स्मृतः।
रसायनो गुन्महरो भेदनोऽर्शोविकारहा
पीलुतीक्ष्णश्च मधुरः कफहा वह्निदीपनः।।

इति द्वात्रिंशो गणः

समाप्तं औषधिव्याख्यानम्।।

INDEX
(Numbered Items)

മലയാള പദസൂചി

SANSKRIT, BOTANICAL/ENGLISH NAMES OF MALAYALAM WORDS USED IN THE TEXT

അകിൽ	अगरु	*Aquilaria Agallocha*
അഞ്ജനക്കല്ല്	तार्क्ष्यशैल	*Antimony Sulphate*
അടകൊതിയൻ	जीवन्ती	*Leptadenia Reticulata*
അടയ്ക്കാ	क्रमुक	*Areca Catechu*
അതിബലം	अतिबला	*Sida Cordifolia*
അതിമധുരം	मधुयष्टी	*Liquorice Plant*
അതിവിടയം	अतिविषा	*Aconitum Heterophyllum*
അത്തി	उदुम्बर	*Ficus Racemosa*
അത്തിത്തിപ്പലി	वसिर	*Scindapsus Officinalis*
അമ	शर	*One of the Tṛṇapañcamūlas*
അമരി	नीलिनी	*Indigofera Tinctoria*
അമൃതവല്ലി	गुडूची	*Tinospora Cordifolia*
അമ്പഴം	अम्बष्ठ	*Spondias Mangifera*
അയമോദകം	अजमोद	*Carum Roxburghianum*
അരത്ത	रास्ना	*Alpinia Galanga*
അരയാൽ	अश्वत्थ	*Ficus Religiosa*
അശോകം	कर्णपूरक	*Saraca Indica*
അശ്വത്ഥം	अश्वत्थ	*Ficus Religiosa*
ആടലോടകം	अटरूषक	*Adhatoda Vasica*
ആട്ടുകൊട്ടപ്പാല	अजशृङ्गी	*Rhus Succedanea*
ആമ്പൽ	कल्हारं	*Nymphaea Lotus*

ആര്യവേപ്പ്	निंव	*Azadirachta Indica*
ആറ്റുവഞ്ചി	अन्या विदुला	*Syzygium Cumini*
ആവിമരം	करञ्ज	*Pongamia Pinnata*
ഇഞ്ചിപ്പുല്ല്	कुश	*Andropogon Citratus*
ഇന്തുപ്പ്	सैन्धवं	*Rock Salt*
ഇരിപ്പ	गुडपुष्पकः	*Madhuca Indica*
ഇരിവേലി	लामज्जकं; जल	*Cymbopogon Jwarancusa*
ഇരിപ്പൂൾമരം	कपिला	*Dalbergia Sissoo*
ഇരുത്തി	ऋद्धि	*Habenaria intermedia*
ഇലക്കള്ളി	वज्रकण्डक	*Euphorbia Neriifolia*
ഇലവ്	शाल्मली	*Salmalia Malabarica*
ഇലവർങ്ങം	लवङ्गं	*Syzygium Aromaticum*
ഇലവിൻപശ	शाल्मलीवेष्टक	*Gum of Salmalia Malabarica*
ഈന്തൽ	कुन्दुरुकी	*Boswellia Serrata*
ഉകമരം	तीक्ष्णतरु	*Careya Arborea*
ഉങ്ങ്	करञ्ज	*Pongamia Pinnata*
ഉത്തരകിരിയാത്ത്	किराततिक्त	*Swertia Chirata*
		Lotus like plant)
എരിക്ക്	अर्क	*Calotropis gigantea*
എലിച്ചെവി	आखुकर्णी	*Baliospermum Montanum*
എലിച്ചെവിയൻ	आखुकर्णी	*Baliospermum Montanum*
ഏലം	रेणुका	*Elettaria Cardamomum*
ഓരില	पृश्निपर्णी	*Uraria Picta*
ഓരിലത്താമര	पद्मचारिणी	*Hibiscus Hutabilis (A kind of*
കച്ചോരം	कच्छुरा	*Hedychium Spicatum*

കച്ചോലം	कच्छुरा	*Hedychium Spicatum*
കടമ്പ്	कदम्ब	*Anthocephalus Cadamba*
കടലാടി	अपामार्ग	*A type of Sphaeranthus Indicus*
കടുകരോഹിണി	मत्स्यपित्त	*Picrorhiza Kurroa*
കടുകാ	मत्स्यपित्त	*Picrorhiza Kurroa*
കടുക്ക	हरीतकी	*Terminalia Chebula*
കടുമ്പ്	कदम्ब	*Anthocephalus Cadamba*
കണ്ടകാരി	धावनी	*Solanum Xanthocarpum*
കണ്ടിവെണ്ണ	तुरुष्क	*Altingia Excelsa*
കമ്പിപ്പാല	कम्पिल्यक	*Mallotus Philippinesis*
കരിങ്കറുക	शतपर्विका	*Cynodon Dactylon*
കരിങ്ങാലി	खदिर	*Acacia Catechu*
കരിനൊച്ചി	निर्गुण्डी	*Vitex Negundo*
കരിങ്കുമ്പിൾ	कट्फला	*Myrica Nagi*
കരിങ്കുറിഞ്ഞി	सैरेयक	*Barleria Prionitis*
കരിമുരിങ്ങ	शिग्रुक (सौभञ्जन)	*Moringa Oleifera*
കരിമ്പന	ताल	*Borassus Flabellifer*
കർക്കടശൃംഗി	मेषशृङ्गी	*Rhus Succedanea*
കർപ്പരി	तुत्थं	*Copper Sulphate*
കർപ്പൂരശിലധാതു	शिलाजतु	*Mineral Pitch*
കൽക്കണ്ടം	मत्स्यण्डि	*Sugar Candy*
കൽത്താമര	प्रपुण्डरिका	*A variety of lotus (Land Lotus)*
കല്ലാൽ	प्लक्ष	*Ficus Lacor*

കറിയുപ്പ്	सामुद्रलवणं	*Common Salt (Sodium Chloride)*
കറുക	दूर्वा	*Cynodon Dactylon*
കാകമാചി	ध्वाङ्क्षमाची	*Solanum Nigrum*
കാകോളി	ध्वाङ्क्षोली	*Roscoea Purpurea (one of the 8 drugs in Aṣṭavarga)*
കാക്കക്കൊടി	ध्वाङ्क्षवल्ली	*Ardisia Solanacea*
കാഞ്ഞിരം	विषमुष्टि	*Strychnos Nux Vomica*
കാട്ടിരിപ്പ	मधूक	*A variety of Madhuca Indica*
കാട്ടുചെറുപയർ	मुद्गपर्णी	*Phaseolus Trilobus*
കാട്ടുതുളസി	अर्जकं	*Wild variety of Ocimum Sanctum*
കാട്ടുതൃത്താവ്	अर्जकं	*Wild variety of Ocimum Sanctum*
കാട്ടുമുഞ്ഞ	अरण्यका	*Premna Integrifolia*
കാട്ടുമുരിങ്ങ	मधुशिग्रु	*Moringa Oleifera*
കാട്ടുമുളക്	चविका	*Piper Chaba*
കാട്ടുവെള്ളരി	चित्रफला	*Citrullus Colocynthis*
കാട്ടുഴുന്ന്	माषपर्णी	*Teramnus Labialis*
കിലുകിലുക്കി	कटभी	*Clitoria Ternatea*
കുങ്കുമം	काश्मीरं	*Crocus Sativus*
കുടകപ്പാല	कुटज	*Halarrhena Antidysenterica*
കുടകപ്പാലയരി	कुटजबीजं	*Seed of Kuṭaja*
കുന്തിരിക്കം	कुन्दुरुकी	*Boswellia Serrata*
കുന്തുരുക്കം	कुन्दुरुकी	*Boswellia Serrata*
കുന്നി	गुञ्जा	*Abrus Precatorius*
കുമ്പിൾ	काश्मर्य	*Gmelina Arborea*
കുശ	दर्भ	*Desmostachya Bipinnata*

കുസുമം	धातकी	*Woodfordia Fruiti Cosa*
കുസ്തുംബരി	कुस्तुम्ब्री	*Coriandrum Satium*
കുറുന്തോട്ടി	बला	*Sida Acuta*
കൂവളം	बिल्व	*Aegle Marmelos*
കൃഷ്ണതുളസി	कृष्णतुलसी	*Ocimum Sanctum (Black Variety)*
കൈപ്പച്ചുര	तुम्बी	*Laginaria Siceraria (Bitter variety)*
കൊടുവേലി	चित्रक	*Lead Wort*
കൊട്ടം	कुष्ठ	*Saussurea Lappa*
കൊത്തമ്പാലരി	कुस्तुम्बरी	*Coriandrum Satium*
കൊന്ന	कर्णिकार	*Cassia Fistula*
കോവൽ	बिम्बी	*Coccinia Cordifolia*
കംഗു	ज्योतिष्मती	*Celastrus Paniculatus*
ക്ഷീരകാകോളി	क्षीरकाकोली	*One of the 8 drugs in Aṣṭavarga*
ഖദിരം	खदिर	*Acacia Catechu*
ഗളസൂഗായി	मेषशृङ्गी	*Aristolochia Bracteata*
ഗുൽഃജ്ജ ഗുലു	गुग्गुलु	*Commiphora Mukul*
ഗോമൂത്രം	गोमूत्रं	*Cow's urine*
ചഞ്ചല്യം (ചെഞ്ചല്യം)	सर्जरस	*Shorea Robusta*
ചണ്ഡക്കിഴങ്ങ് (ചണ്ണക്കിഴങ്ങ്)	परिपेलवं; चण्डा	*Cyperus Aceae*
ചാതുർജ്ജാതകം (ചതുർജ്ജാതകം)	चातुर्जातकं	*A combination of Elā, Patraka Lavaṅga and Nāgakesara*

ചന്ദനം	गन्धसारं	*Santalum Album*
ചർമലന്ത	चर्मसाह्वा	*Trigonella Foenum Graecum*
ചവൽക്കാരം	सौवर्चल	*Sonchal Salt*
ചാണകം	करीषं	*Cow Dung*
ചിറ്റാവണക്ക്	एरण्ड	*Ricinus Communis*
ചിറ്റീന്തൽ	परूषक	*Grewia Asiatica*
ചിറ്റേലം	सूक्ष्मैला; एलवालु	*Elettaria Cordomomum*
ചുക്ക്	शुण्ठी	*Zingiber Officinale (Dried)*
ചുവന്ന ആവണക്ക്	हस्तिपर्णी	*Red variety of Ricinus Communis*
ചുവന്ന തൃത്താവ്	कृष्णतुलसी	*Red variety of Ocomum Sanctimum*
ചെങ്കടുക്	रक्तसर्षपा	*Sinapis Ramosa*
ചെങ്കൊടിത്തൂവ	धन्वयाष	*Alhagi Pseudalhagi*
ചെന്തഴുതാമ	रक्तपुनर्नवा	*Boerhaavia Diffusa (Red variety)*
ചെന്താമര	रक्तकमलं	*Nymphaea Rubra*
ചെറിയകുശ	कुरूट	*Citrus Medica (Small variety)*
ചെറിയഞാവൽ	क्षुद्रफला	*Syzygium Cumini (A variety of Jambū having smaller fruits)*
ചെറുകടുക്	सर्षपा	*Brassica Compestris (A variety of Mustard)*
ചെറുതേക്ക്	भाङ्गीं	*Clerodendrum Serratum*
ചെറുപുന്ന	पुन्नाग	*Calophyllum Inophyllum*
ചെറുപുന്നരി	ज्योतिष्मती	*Celastrus Paniculatus (Seed of Jyotiṣmatī)*

ചെറുപുള്ളടി	हंसपादी	*Adiantum Lunulatum*
ചെറുവഴുതിന	बृहती	*Solanum Indicum*
ചേരുംകാ	भल्लातक	*Semecarpus Anacardium*
ചോനകപ്പുല്ല്	स्पृक्का	*Delphinium Zalil*
ജടാമാഞ്ചി	मांसीजटा	*Nardostachys Jatamansi*
ജീരകം	जीरक	*Cuminum Cyminum*
ജീവകം	जीवक	*One of the eight drugs in Aṣṭavarga*
ജംവാളം	पीलु	*Salvadora Oleoides*
ഞമ	धव	*Anogeissus Latifolia*
ഞാവൽ	जंवू	*Eugenia jambolan*
ഞാഴൽ	प्रियङ्गु	*Sataria Italica*
ഞെരിഞ്ഞിൽ	गोक्षुर	*Tribulus Terrestris*
ഡാഡിമം	डाडिमं	*Punica Granatum*
തകരം	तगरं	*Valerina Wallichii*
താന്നിയ്ക്കാ	बिभीतक	*Terminalia Belerica*
താമര	पद्मिनी	*Nymphaea Alba*
താമരക്കാ	पद्मकर्णिका	*Pericarp of lotus*
താമരക്കുരു	पद्मबीजं	*Seed of lotus*
താമരപ്പൊടി	पद्मपरागं	*Pollen of lotus*
താമരയല്ലി	पद्मकेसरं	*Filament of lotus*
താള	ताल	*Borassus Flabellifer*
തിപ്പലി	पिप्पली	*Ficus Religiosa*
തിപ്പലീമൂലം	पिप्पलीमूलं	*Dried root of Pippali*

തിമിശമരം	तिमिश	*Ougenina Dalbergioides*
തുണ്ഡികാഗ്രാളി	कृष्णमल्लिका	*Ocimum Basilicum*
തുത്ഥം (തുരിശ്)	तुत्थं	*Copper Sulphate*
തുമ്പരു (ര?)	तिन्दुकी	*Avicennia Oficinalis*
തുണിയാങ്കം	स्थौणेयक	*Taxus Baccata*
തെങ്ങ്	केरवृक्ष	*Coconut Tree*
തേക്കട	वृश्चिकाली	*Rhus Succedanea (A variety of Meṣaśṛṅgī)*
തേക്കുമരം	खरच्छद	*Tectona Grandis*
തേൻ	माक्षिकं	*Honey*
തേരുമരം	तिमिश	*Ougeisia Dalbergioides*
തേറ്റാംപരൽ	कतक	*Strychnos Potatorum (Clearing Nut)*
തോരന്തൂക്കി	वरण	*Crataeva Nurvala*
ത്രികടു	व्योष	*A cover term for śuṇṭhī, Marica and Pippali*
ത്രികോല്പക്കൊന്ന	त्रिवृता	*Operculina Turpethum*
ത്രിഫല	त्रिफला	*A collective name for Terminalia Chebula, Terminalia Balerica and Emblica Oficinalis*
ദർഭ	कुश	*Demostachya Bipinnata*
ദർഭപ്പുല്ല്	दर्भ	*Desmostachya Bipinnata*
ദേവതാരം	देवदारु	*Cerdus Deodara*
ദേവതാളി	जीमूतक	*Luffa Echinata*
ദ്രാക്ഷാ	मधुयोनि	*Vitis Vinifera*

ധാതകീകുസുമം	ताम्रपुष्पी	*Woodfordia Fruiti Cosa*
നന്ദിവൃക്ഷം	प्ररोही	*Cedrela Toona*
നറുനിണ്ടി	शारिब	*Hemidesmus Indicus*
നാക്കണക്കരിമ്പ്	उत्कटा	*A variety of sugar cane*
നാഗകുസുമം	नागकेशर	*Mesua Ferra*
നാഗദന്തി	नागदन्दी	*Baliospermum Montanum*
നാഗപ്പൂവ്	नागकेशर	*Mesua Ferrea*
നാഗബലാ	नागबला	*Sida Spinosa*
നാഗുണം	सुक्ति	*A fragrant medicinal herb*
നാന്മുകപ്പുല്ല്	ध्यामक	*Citronella Grass*
നായ്ക്കരണ	मर्कटी	*Mucuna Pruriens*
നിലഞ്ഞാവൽ	नादेयी	*Syzygium Cumini*
നീരശ്ശിനി	कामुक	*Flacourita Jangomas*
നീർമരുത്	ककुभार्जुन	*Terminalia Arjuna*
നീർമാതളം	वरण	*Crataeva Nurvala*
നീർവാളം	पीलु	*Salvadora Oleoides*
നീലക്കരിമ്പ്	इक्षु	*A black variety of sugarcane*
നീലക്കുറിഞ്ഞി	आर्त्तगल	*Barleria Cristata*
നീലത്താമര	नीलोत्पलं	*A blue variety of Lotus*
നീലി	नीलिनी	*Indigofera Tinctoria*
നെയ്യ്	घृतं	*Ghee*
നെല്ലിയ്ക്കാ	आमलक	*Emblica Oficinalis*
പഞ്ചമംപഴുക്കാ	जातीरस	*A kind of poison*
പഞ്ചസാര	शर्करा	*Sugar*

പടവലം	पटोल	*Trichosanthes Dioica*
പത്രം	तमालपत्रं	*Leaves of Cinnamomum*
പദ്മകം	पद्मकं	*Prunus Puddum*
പപ്പടക്കാരം	यवक्षार	*Nitre Tamala*
പയിൻചെഞ്ചല്യം	सर्जरस:	*Shorea Robusta*
പലകപ്പയ്യാനി	श्योनाका	*Oroxylum Indicum*
പശുവിൻപാൽ	गोक्षीरं	*Cow's Milk*
പാച്ചോറ്റി	लोद्ध्र	*Symplocos Racemosa*
പാടക്കിഴങ്ങ്	पाठा	*Cissampelos Pareira*
പാതിരിമരം	पाटला	*Stereospermum Suaveolens*
പാലപ്പഴം	राजादन	*Fruit of kṣīrīvṛkṣa*
പാലമരം	सप्तपर्णी	*Alstonia Scholaris*
പാൽമുതക്ക്	क्षीरविदारी	*Ipomoea Digitata*
പാൽവള്ളി	गोपवल्ली	*Hemidesmus Indicus*
പാഷാണഭേദി	बूक	*Bergenia Ligulata*
പീച്ചിങ്ങ	कोशातकी	*Luffa Acutangula*
പീതചന്ദനം	पीतसारं	*A variety of Santalum Album*
പീരപ്പെട്ടി	चित्रा	*Plumbago Zeylanica Linn*
പുലിച്ചുവടി	व्याघ्रनखक	*A fragrant medicinal herb*
പുഷ്പകാസീസം	पुष्पकासीसं	*Iron Sulphate*
പൂതണക്കപ്പുല്ല്	भूस्तृण	*A variety of Mustard*
പൂതിഗന്ധി	पूतकाष्ठ	*Operculina Turpenthum*
പെരുങ്കടുക്	रक्तसर्षपा	*Sinapis Ramosa*
പെരുങ്കുരുമ്പ	मूर्वा; मोरट	*Sansevieria Zeylanica*

പേക്കുമ്മട്ടി	इन्द्रवारुणी	*Citrullus Colocynthis*
പേരാൽ	न्यग्रोध	*Ficus Bengalensis*
പൊന്നാരി വീരൻ (പൊന്നാവീരം)	क्षवक	*Cassia Occidentalis*
പൊൻനിറംകുറിഞ്ഞി	कुरण्डक	*Yellow Amaranth*
പ്രപുണ്ഡരീകം	प्रपुण्डरीकं	*A lotus like herbal species growing in rocky terrain*
പ്ലാവ്	पनस	*Artocarpus Heterophyllus*
പ്ലാശ്	पलाश	*Butea Monosperma*
ബദരീചമരം	बदरी	*Zizyphus Jujuba*
ബൃഹൽപഞ്ചമൂലം	बृहत्पञ्चमूलं	*A cover term for the roots of Kaśmarī, Pāṭala, Bilva Śyonākā and Araṇi*
ഭദ്രമുസ്ത	भद्रमुस्ता	*Cyperus Rotundus*
ഭൂദിംഗുല്ലു	बस्तान्त्री	*Argyreia Speciosa*
ഭൂർജവൃക്ഷം	भूर्ज	*Betula Utilis*
മഞ്ജിഷ്ഠാ	मञ्जिष्ठा	*Rubia Cordifolia*
മഞ്ഞക്കരിമ്പ്	उत्कटा	*A variety of Sugarcane*
മഞ്ഞപ്പാൽ	हेमदुग्धा	*Yellowish Milk*
മഞ്ഞൾ	हरिद्रा	*Curcuma Longa*
മണത്തക്കാളി	काकमाची	*Solanum Nigrum*
മരമഞ്ഞൾ	दारुहरिद्रा	*Berberis Aristata*
മരുത്	अजकर्ण	*Vateria Indica*
മരുവകം	खर्बुस	*Ocimum Basilicum*
മലവേപ്പ്	महानिम्ब	*Melia Azedarach*

മലങ്കാരയ്ക്ക	मदन	*Randia Dumetorum (One of the eight drugs in Aṣṭavarga)*
മഹാമേദ	महामेदा	*Erythrina Indica*
മാഞ്ചി	गन्धमांसी	*Nardostachys Jatamansi*
മാതളനാരകം	डाडिमं	*Punica Granatum*
മാവ്	आम्र	*Mangifera Indica*
മുക്കുറ്റി	समङ्गा	*Mimosa Pudica*
മുഞ്ഞ	अरणी	*Premna Integrifolia*
മുതക്ക്	विदारिका	*Pueraria Tuberosa*
മുതിര	कुलस्था	*Dolichos Biflorus*
മുത്തങ്ങ	भद्रमुस्ता	*Cyperus Rotundus*
മുത്തദരം	पलाश	*Butea Monosperma*
മുന്തിരിങ്ങ	द्राक्षा	*Vitis Vinifera*
മുളകല്ല്	तुकाक्षीरी	*Bamboo Salt*
മുളക്	मरिच	*Piper Nigrum*
മുളയരി	यवफल	*Seed of Bamboo*
മുഷ്കകവൃക്ഷം	मोक्षक	*Schrebera Swietenioides*
മൂവില	सालपर्णी	*Desmodium Gangeticum*
മെഴുക്	मधूच्छिष्टा	*Bees wax*
മേദ	मेदा	*One of the eight drugs in Aṣṭvarga*
മേന്തോന്നി	अग्निजिह्वा	*Gloriosa Superba*
മോര്	तक्रं	*Butter Milk*
യവക്ഷാരം	यवक्षार	*An Alkali preparation from Barley containing Potasium Bicarbonate*

യവനെല്ല്	यवा	*Hordeum Vulgane*
രക്തചന്ദനം	रक्तचन्दनं	*Ptercarpus Santalinus*
രാമച്ചം	उशीरं	*Vetiveria Zizanioides*
രേണുകം	रेणुका	*Vitex Agnus Castus*
ലഘുപഞ്ചമൂലം		*A cover term for the roots of Pṛśniparṇī, Dhāvatī, Bṛhatī Gokṣura and Sālaparṇī*
ലന്തമരം	बदरी	*Zizyphus Jujuba*
ലാംഗലി	अग्निजिह्वा	*Gloriosa Superba*
വഞ്ചി	विदुला	*Syzygium Cumini*
വയമ്പ്	वचा	*Acorus Calamus*
വയ്യങ്കത	विकङ्कत	*Gymnosporia Spinosa*
വലിയ ഏലം	स्थूलैला	*Amomum Subulatum*
വലിയകടലാടി	खरमञ्जरी	*Achyranthes Aspera*
വലിയപാവൽ	कारवल्ली	*Memordica Charantia*
വാകമരം	शिरीष	*Albizzia Lebbeck*
വാഴ	कदली	*Musa Paradisiaca*
വിഴാലരി	विडङ्ग	*Embelia Ribes*
വിഷമുഷ്ടി	विषमुष्टि	*Strychnos Nux Vomica*
വീരതരു	वीरतरू	*Dichrostachys Cinerea*
വൃദ്ധി (ഋദ്ധി)	तुष्टि	*Habenaria Intermedia*
വൃശ്ചികാളി	नक्रदंष्ट्रिका	*Rhus Succedanea (A variety of Meṣaśṛṅgi)*
വൃഷഭകം	वृषभ	*Microstylis wallichii Lindl A medicinal herb resembling the horn of a bull (one of the eight drugs in Aṣṭavarga)*

വെങ്കരിങ്ങാലി	कदर	*Acacia Catechu*
വെങ്കൊടിത്തൂവ	अनन्ता	*Alhagi Pseudalhagi (white variety)*
വെടിയുപ്പ്	खण्डलवणं	*Artificially prepared salt containing Ammonium Chloride*
വെണ്ണ	नवनीतं	*Butter*
വെൺകരിമ്പ്	काश	*A variety of Sugar Cane*
വെൺതഴുതാമ	श्वेतपुनर्नवा	*Boerhaavia Diffusa (white variety)*
വെൺതാമര	श्वेतकमलं	*Nelumbo Nucifera (white variety)*
വെളുത്ത അത്തി	कुशिक	*Ficus Racemosa*
വെളുത്ത കറുക	श्वेतदूर्वा	*Cynodon dactylon*
വെളുത്ത തൃത്താവ്	गौरीसुरसा	*Ocimum Sanctum*
വെളുത്ത നൈതൽ കിഴങ്ങ്	श्वेतजलजं	*Eymphoea Lotus (Tuber of Śvetajalaja)*
വെളുത്ത പാച്ചോറ്റി	श्वेतलोद्ध्र	*Symplocos Racemosa*
വെളുത്ത പേരാൽ	क्षीरपादपं	*Ficus Bengalensis*
വെളുത്തരം	भूकदम्बक	*A type of Sphaeranthus Indicus*
വെള്ളഎരിക്ക്	विकीर्ण	*Calotropis Gigantea*
വെള്ളമുരിങ്ങ	शिग्रु	*Moringa Oleifera*
വെള്ളൂരകം	अतिबला	*Sidonia Rhombifolia*
വേങ്ങ	बन्धूक	*Pentapetes Phoenicca*
ശതകുപ്പ	शतपुष्पा	*Foreniculum Valgare*
ശതാവരി	शतावरी	*Asparagus Racemosus*

ശംഖുപുഷ്പി	शांखिनी	*Evolvulus Alsinoides*
ശീതിമരം (ഞമ)	धव	*Anogeissus Latifolia*
സമുദ്രപ്പച്ച	पत्रं	*Leaves of Cinnamomum Taxila*
സരള (സരളമരം)	स्निग्धदारू	*Operculina Turpethum*
സർജ്ജരസം	सर्जरस	*Shorea Robusta*
സൂര്യഭക്തം	सुवर्चला	*Malva Sylvestris*
സോമനാദികായം	हिङ्गु	*Ferula Foetida*
സൗവർച്ചലം	सौवर्चल	*Sonchal Salt*
സൗവീരാഞ്ജനം	सौवीराञ्जनं	*Lead Sulphide*
സ്ഥലപത്മിനി	पुष्करपर्णी	*Hibiscus Mutabilis*
സ്ഥൗണേയം	कुलस्थ	*Dolichos Biflorus*
സ്രോതോഞ്ജനം	स्त्रोतोञ्जनं	*Antimony Sulphide stibinite*
ഹിംഗു	हिङ्गु	*Ferula Foetida*
ഹിംഗുപത്രം	पृथ्वीका	*Gardenia Gummifera*
ഹംസപാദീ	हंसपदी	*Adiantum Lunulatum*

Madanādinighaṇṭu is an important treatise in the field of Āyurveda-nighaṇṭus. This 10th century work is by Chandranandana, the author of Padārthacandrikā commentary on the Sūtrasthāna of Aṣṭāṅga-hṛdaya. This Nighaṇṭu enlists 285 medicinal items under 32 gaṇās. A comprehensive description of each item is given providing information on their nature and use. It also enlists the synonyms of each entry.

SB Press(P) Ltd, Tvm-1